Tanjore Sarasvati Mahal Series - No. 362

॥ श्रीः ॥

॥ श्रीगौरीमायूरमाहात्म्यचम्पूः ॥

॥ श्रीअप्पाध्वरिविरचिता ॥

ஸ்ரீ கௌரீ மாயூர மாஹாத்மிய சம்பூ

THANJAVUR MAHARAJA SERFOJI'S
SARASVATI MAHAL LIBRARY, THANJAVUR.

1995] [Price Rs. 30--00

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

Tanjore Sarasvati Mahal Series – No. 362.

॥ श्रीः ॥

॥ श्रीगौरीमायूरमाहात्म्यचम्पूः ॥

॥ श्रीअप्पाध्वरिविरचिता ॥

Sri Gauri Mayura Mahatmya Campuh

Sanskrit Text with Tamil Introduction

Edited by :

Sahitya Siromani
Thirumathi S. **RAJALAKSHMI**
Sanskrit Pandit,
Sarasvati Mahal Library, Thanjavur.

THANJAVUR MAHARAJA SARFOJI'S
SARASVATI MAHAL LIBRARY, THANJAVUR.

1995] [Price Rs. 30—00

0362

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

Sarasvati Mahal Library. Thanjavur

BIBLIOGRAPHICAL DATA

Title of the Book	...	Sri Gauri Mayura Mahatmya Campuh
Editor	...	Thirumathi. S. Rajalakshmi
Publisher	...	Director Sarasvati Mahal Library. Thanjavur
Publication No	...	362
Language	...	Sanskrit
Edition	...	I Edition
Date of Publication	...	April, 1995
Paper used	...	14. 2 Kg Seshasayee
Size of the Book	...	21 × 14 cm.
Printing Type used	...	16 point.
Number of pages	...	174
No. of copies	...	500
Price	...	Rs. 30/-
Printer	...	Sarasvati Mahal Library Press
Binding	...	Wrapper
Subject	...	Literature

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

வெளியீட்டாளர் முகவுரை

இந்திய இலக்கியங்கள் இராமாயணம், மகாபாரதம் போன்ற இதிகாசக் கதைகளை அடிப்படையாகக்கொண்டு எழுந்தவை என்றும், புராணக் கதைகள், வரலாற்றுக் கதைகள், தலபுராணக் கதைகள் ஆகியவற்றை அடிப்படையாகக் கொண்டு எழுந்தவையென்றும், கவிஞனின் கற்பனையால் உதித்தவை என்றும் வகைப்படுத்தலாம்.

இவ்வகைகளில் தல புராணத்தை அடிப்படையாகக் கொண்டு எழுந்ததே 'கௌரீ மாயூர மாஹாத்மிய சம்பூ' என்னும் இந்த நூல். இந்த நூல் வடமொழியில் இயற்றப் பட்டுள்ளது. இதனை இயற்றியவர் 'அப்பாத்வரீ' என்னும் புலவர். இவர் தஞ்சையை அரசு புரிந்த சகஜி மன்னனால் பாராட்டி ஆதரிக்கப்பட்டவர்.

இந்த நூல் முதன்முறையாக இப்பொழுதுதான் அச்சாகி வெளிவருகிறது. சம்ஸ்கிருதம் அறியாதவர்களும் எளிதில் அறிந்துகொள்ளும் வண்ணம் வடமொழிக் காவியங்களின் அறிமுகம், நூலாசிரியர் வரலாறு, இந் நூலின் கதைச்சுருக்கம் ஆகியவை இந்நூலின் தொடக்கத் தில் பதிப்பாசிரியரால் தமிழில் எழுதி அளிக்கப்பட் டுள்ளன. இவ்வாறு சிறப்பாக இந்நூலைப் பதிப்பித் துள்ள நூலக வடமொழிப் பண்டிதர் திருமதி எஸ். இராஜலட்சுமி அவர்களுக்கு எனது பாராட்டுகள்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இந்நூல் சிறப்பாக வெளிவருவதற்கு உரிய பணிகளை மேற்கொண்ட இந்நூலகத்தின் நிருவாக அலுவலர் பொறுப்பு வகிக்கும் திரு. அ. பஞ்சநாதன் மற்றும் சிறப்பாக அச்சிட்டுள்ள அச்சகப்பிரிவுப் பணியாளர்கள் ஆகியோரைப் பாராட்டி மகிழ்கின்றேன்.

இந்நூல் வெளிவர பொருளுதவி புரிந்த மைய அரசுக்கு எனது நன்றியைத் தெரிவித்துக்கொள்கிறேன்.

வழக்கம்போல் இந்த நூலகத்தின் வெளியீட்டு நூல்களை வாங்கிப் படித்துப் பயனுறும் ஆராய்ச்சியாளர்கள், மாணவர்கள், மற்றும் பொதுமக்கள் இந்த நூலையும் வாங்கிப் படித்துப் பயனடைய வேண்டும் என்று கேட்டுக் கொள்கிறேன்.

தஞ்சாவூர்
27—4—95

தேவ. ஜோதி ஜெகராஜன், இ. ஆ. ப.
மாவட்ட ஆட்சியர் மற்றும் இயக்குநர்,
சரசுவதி மகால் நூலகம்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ विषयसूची ॥

विषयः		पुटसंख्या
1.	प्रस्तावना	— i-vi
2.	कथासङ्ग्रहः	— vii-xx
3.	முகவுரை	— i-viii
4.	கௌரிமாயூர மாஹாத்மிய சம்பூ (கதைச் சுருக்கம்)	IX-XXXIX
5.	गौरीमायूरमाहात्म्यचम्पूः	
	प्रथमस्तरङ्गः	— 1
	द्वितीयस्तरङ्गः	— 17
	तृतीयस्तरङ्गः	— 36
	चतुर्थस्तरङ्गः	— 58
	पञ्चमस्तरङ्गः	— 76
6.	एतच्चम्पूस्थानां श्लोकानां अकाराद्यनुक्रमणिका	— 91

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

AN APPEAL

Manuscripts on Palm Leaf or Paper of the ancient works of the wise men of the past, are the great treasures, solely inherited by the Nation and it is the moral obligation of persons who possess them to preserve them safely for the future generations of mankind.

Probably you have some of these in your possession or you know friends or neighbours who possess them. You can make a great contribution to the cause of the preservation not only of our National Culture but also to the Culture of Humanity as a whole by arranging to present such manuscripts to the famous T. M. S S. M. Library, Thanjavur.

The manuscripts so presented will be accepted and acknowledged with pleasure and gratitude by the authorities of the Library, preserved with meticulous care and made available to successive generations of readers and scholars for study and research. The hitherto unpublished works found among them, will be printed and published in due course, as facilities occur, with the expression of the Library's gratitude for your gift.

The great Scholar-King of Tanjore, Rajah Serfoji, has attained immortal fame by dedicating enormous time and wealth to the expansion and firm establishment of this world-famous 'Sarasvati Mahal Library.' It is open to you to share the honour of Serfoji, in your own measure by contributing your manuscripts to the great institution built by him.

This great Honour is beckoning to you to accept it. Will you hasten to take it up? The Library waits for your answer.

DIRECTOR,
Sarasvati Mahal Library, Thanjavur.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

॥ प्रस्तावना ॥

श्रीवत्साम्बुधिकौस्तुभोऽप्परिवरो ह्यप्पाध्वरीन्द्रः कविः
तातो यस्य चिदम्बरेश्वरमखी विख्यातविद्वन्मणिः ।
पाजीराजकृतादरस्सुमनसां मान्यो मयूरीपुरे
रेजे चोलमहीतले धृतयशास्सद्यायजूकाग्रणीः ॥

सदयमूर्तिरयं गुरुमूर्तिरा-
ह्युदयमूर्तिरिति प्रथितोऽभवत् ।
तस्य शिष्यवर एव महीभृता
पाजिनोपचरितोऽप्पमहाकविः ॥

तेनेयं ग्रथिता चम्पूर्गौरीमायूरनामिका ।
इदंप्राथम्यरूपेण प्रकटीकरवाण्यहम् ॥

अयि भोः! काव्यनाटकालङ्कारादिसाहितीरत्नसततािध्ययननिरन्तरनिर्यत्ननिर्यातसुधारसास्वादहृष्टपुष्टमतयः !! सुमतयः !, रसिकतल्लजाः !!!

अयमिदानीं नूतनश्चम्पूग्रन्थः तत्रभवतां प्रियपाठकानां भवतां करकमलयोरुपहारीक्रियते मायूरनिवासिना अस्माकं पाजीमहाराजेन सम्मानितेन अप्पाध्वरिनामकेन विद्वन्माणिना विरचितः, गौरीमायूरमाहात्म्यप्रतिपादकः इदम्प्रथमतया मया ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

।। काव्यस्य महिमा ।।

विदितचरमेवैतत् समीक्षावतां प्रेक्षावतां यत् वेदेतिहास-पुराणानामिव काव्यानामपि पुमर्थसाधकत्वं सुलभतया सम्पद्यते । "काव्यालापांश्च वर्जयेदि" ति वाक्यमपि असत्काव्यविषयं, न तु सत्काव्यगोचरमिति पटुतमैरालङ्कारिकैस्सिद्धान्तितत्वात्, काव्यानां प्रयोजनवत्वं, नित्यनिरतिशयब्रह्मानन्दसब्रह्मचारिरसप्रदत्वं, तेन पुरुषार्थप्रदत्वं चेति न तिरोहितमेतत् ।

अत एव,

"निर्दोषं गुणवत्काव्यं अलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्यात् कीर्तिं प्रीतिं च विन्दति" ।।

इति भोजेन, सरस्वतीकण्ठाभरणे

"धर्मार्थ काममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणात्" ।।

इति रसप्रकाशकारेण,

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे" ।।

इति काव्यप्रकाशकारेण,

एवमन्यान्यैरालङ्कारिकैः विशिष्टकाव्यकरणादपि प्रयोजन-मभिप्रेतमापद्यत इति भूयो भूयः प्रपञ्चितम् । काव्यप्रकाशकारस्य "कान्तासम्मिततयोपदेशयुजे" इति वचनेन ज्ञायत एव, इदं, यत् वेदानप्यतिक्रम्य साधारणजनानपि वेदादिप्रतिपाद्यं "साधुकर्म कुरु, मा कुरु असाधुकर्म" इतीमं विषयं प्रतिपाद्य

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सरण्या ललितया काव्यं तानुद्धरति, उपनिषत्प्रतिपाद्यस्य ब्रह्मणस्समीपे निवेशयतीति । अतो वयमिदमपि सगर्वं प्रतिपादयितुमभिलाषामः, यत् " ये सुकुमारमतयः राजकुमारप्रभृतयः, " निसर्गदुर्बोधमिदं शास्त्रं, कथमिवात्र निष्फलमात्मानमवसादयामः", इति सततमालोचयन्तः, शास्त्रे न प्रवर्तन्ते, तानपि " प्रथमं लीढमधवः पिबन्ति कटुकौषधमिति " रीत्या काव्यं कान्ता इव सन्मार्गे प्रवर्तयति, निवर्तयति चासन्मार्गादिति वैशिष्ट्यमहो काव्यकलापस्य ।

तादृशं काव्यं श्रव्यदृश्यात्मना द्विविधं विभज्यते । श्रव्यं श्रवणैकविषयं, दृश्यं तु दृष्टीनामपि गोचरं भवतीति तल्लक्षणम् । यद्यप्यत्र दृश्यस्य श्रव्यात् वैशिष्ट्यं प्रतिपादयितुं शक्यत एव, तथापि अस्माभिः प्रतिपिपादयिषितस्य चम्पूग्रन्थस्य तद्वैशिष्ट्यं सम्पत्स्यत एवेति विरमामः । तादृशं श्रव्यकाव्यं, पद्यकाव्यं, गद्यकाव्यं तदुभयात्मकं चम्पूकाव्यमिति त्रिविधं भवति । पद्यकाव्यं, गीतारूढैः भिन्नभिन्नवृत्तैः श्लोकैः प्रपञ्चितत्वान्माक्षिकमिव मधुरमधुरमपि भवितुमर्हति । तथैव गद्यकाव्यमपि समासबहुलैः प्रासविन्यासचतुरैः अलङ्कारप्रचुरैश्च वाक्यैः विस्तृतत्वात् द्राक्षाफलमिव भक्ष्यं भक्षणमिव मधुरतममपि भवितुमर्हत्येव । तद्द्वयमपि मिश्रितं काव्यपात्रे निक्षिप्यते चेत् तर्हि भोक्तॄणां पाठकानां मनसि महत्कुतूहलमुत्पादयेदिति पृथक्तया न वक्तव्यतामपेक्षते । यतः " गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते " इति हि तल्लक्षणम् । यथा वा गीतिकला वाद्यकलया संमिश्रिता सती रसिकानां आसेचनका भवति तथैवायं चम्पूग्रन्थोऽपीति प्रतिपाद्य विरमामः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तादृशस्य महामहिमवतः गौरीमायूरचम्पूग्रन्थस्य रचयिता अप्पाध्वरीति स्मरणीयनामधेयः कश्चन महाकविः । अयं श्रीवत्सान्वयसम्भूतः दिवारात्रं शतमखविरचितशतमखादिसुधाशनस्य चिदम्बरेश्वराध्वरिणः सुपुत्रः पितेव कर्ममार्गैकपथिकश्चासीत् । अस्य च गुरुमूर्तिः पिल्लैशास्त्रिमहोदयस्य सुपुत्रः उदयमूर्तिरेव । तस्य प्रसादादेवाप्पाध्वरिणः कलासु महान् शुभोदयस्समजनि । कविरयं कदासीदिति विषयमधिकृत्य विस्तरेण प्रतिब्रूमः ।

विदितमेवैतत् भारतेतिहाससमीक्षावतां समेषां विदुषां, यद्द्राविडदेशे विद्यमानतिरुच्चीतञ्जावूरमण्डलान्तर्गतः ज्यापरिमितः कावेरीवण्णारुप्रभृतिभिः प्रशस्ताभिर्नदीभिः परिवृतः नदीमातृकः शस्यश्यामलः भूभाग एव पुरा "चोलदेश" इति प्रास्तावि । तस्य च राजधानी नगरीललामभूता तञ्जापुरी नाम नगरी । तामधिष्ठाय, चोलभुवमिमां, पूर्वं चोलभूपाः, पश्चात् *1535-1673* पर्यन्ते काले, नायकवंशीयाः भूनायकाः तदनन्तरं *1676-1855* पर्यन्ते काले भोसलकुलजन्या अजन्याः महाराष्ट्रीयराजन्याश्च पालयामासुः ।

तादृशभोसलकुलजन्यराजन्येषु *1684-1710* पर्यन्ते काले शाजीमहाराजः दाक्षिणात्यभोज इव व्यराजत । एकोजिमहाराजस्य पुत्रत्वेन दीपाम्बागर्भसम्भूतोऽयं शाहजिः जन्मना कविः, पण्डितः, सङ्गीतसाहित्यकलाधुरीणः, बहुभाषाभाषी, नित्यप्रबन्धकर्ता चाभूत् । शाहजीपुरं एकोजीपुरं, दीपाम्बापुरमिति ग्रामान्निर्माय तत्र षड्दर्शिनीपारङ्गतान्पण्डितानावासयामास ।

तस्य च राज्ञस्समये श्रीरामभद्रदीक्षितः, रामनाथमखी, नरहरिदीक्षितः, श्रीधरवेङ्कटेशदीक्षितः, पेरियप्पादीक्षितः, एवमादयः

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

परश्शताः पण्डिता भुवमिमां विद्यामातृकामकुर्वन् । तेष्वन्यतमोऽयमप्पाध्वरी नाम अस्माकं ग्रन्थरचयिता । अयं धातृवर्षे पूर्वोक्तशाहजीमहाराजस्य महामन्त्रिणः त्र्यम्बयरायमखिनः मन्त्रसाहाय्यं कर्तुमत्रागतः । तदाऽनेन भूपालेनोपचरितः, मासत्रयमत्र राज्ञः समीपे भारतमाचारादींश्च श्रावयामास । तेन तुष्टः शाहजिः आचारनवनीतं नाम ग्रन्थं विरचयितुमाज्ञापयामासेति ज्ञायते । प्रस्तुतोऽयं विषयः अप्पाध्वरिणा कृतेषु, "गौरीमायूरचम्पूः", "मदनभूषणभाणः", "आचारनवनीतं" इति प्रसिद्धेषु ग्रन्थेषु, कविस्स्वयमेव प्रस्तौति । तथा च कवेः कालोऽपि क्रिस्तोः परं सप्तदशी शताब्दी एव इति निश्चप्रचम् ।

गौरीमायूरचम्प्वाः मूलकथा, वैयासिकस्कान्दपुराणोक्तस्थलमाहात्म्यादुद्धृतेति प्रतिभाति ।

मातृकाविवरणम् -

विदितमेवैतत् प्रज्ञावतां सर्वेषां संख्यावतां, यत्तञ्जपुरीयसरस्वतीमहालयः भोसलकुलजन्येन स्वनामधन्येन शरभोजिमहाराजेन स्थापितः पालितः पोषितश्च विलसतितमामिदानीमपीति । तत्र एकैव गौरीमायूरमहात्म्यचम्पूर्नाम मातृका समुपलभ्यते । सा च B. No. *10189*, D. No. *4035* सङ्ख्याङ्किता ग्रन्थलिप्या विलिखिता तालपत्रात्मिका विलसति । यद्यपि तत्र परश्शताः दोषाः विद्यन्त एव, तथापि शोधिताः परिष्कृताश्च । किन्तु विद्वांसः एव प्रमाणं, अहं तत्र सफलतां प्राप्तोऽस्मि वा न वेद्मि ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कृतज्ञतानिवेदनम् :-

ग्रन्थस्यास्य सम्पादने मां प्रेरितवद्भ्यः सरस्वतीमहालयाध्यक्ष-पदमलङ्कुर्वद्भ्यः ई. वेङ्कटाचलम् I. A. S., महोदयेभ्यः तथा सरस्वतीमहालयाधिकारिकपदं निर्वहद्भ्यः A. पञ्चनादम् M. A., M. L. I. S. महालयेभ्यश्च कृतज्ञतां निवेदयामि। महालयेऽस्मिन् महत्साहाय्यं कृतवद्भ्यः ब्रह्मश्री कृष्णमूर्तिशास्त्री, श्री P. M. पद्मनाभशर्मा (भूतपूर्वमहालयपण्डितः)' इति नाम-धेयाङ्कितेभ्यः पण्डितप्रकाण्डेभ्यश्च कार्तज्ञ्यं सश्रद्धं निवेदयामि। सरस्वतीमहालयमुद्राक्षरशालाकर्मचारिभ्यः सर्वेभ्यश्च कृतज्ञता निवेद्यते ॥

इत्थं

साहित्यशिरोमणिः

श्रीमती राजलक्ष्मीः

संस्कृतपण्डिता.

तञ्जपुरम्

२४-७-९४

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

॥ कथासङ्ग्रहः ॥

बालानां सुखबोधाय व्युत्पित्सूनां विशेषतः ।
गौरीमायूरमाहात्म्यचम्प्वाः सङ्गृह्यते कथा ॥

॥ प्रथमः तरङ्गः ॥

कविः स्वग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं आदौ मङ्गलं निबध्नाति । तदनन्तरं चिकीर्षितस्य ग्रन्थस्य प्रामाण्यसिद्ध्यर्थं, माहात्म्यवृद्ध्यर्थं च प्रस्तावनां प्रस्तौति । पुरा शतमखः इन्द्रः क्रतुमेकमारभमाणः तपोधनानां निधानं नैमिशारण्यमगच्छत् । तदा बहवो महर्षयः, बादरायणप्रभृतयः कुलपतयः, परश्शतैः शिष्यैः परिवृतः सूतमहामुनिः, शौनकरोमहर्षणपुरस्सरा अन्ये अन्ये महामुनयश्चाहूताः एकत्र समभिलन् । सूतमुनिः बादरायणशिष्य इति हेतोः सर्वाण्यपि पुराणानि अजानात् । अतः परे महर्षयः तन्मुखात्कथान्तरं श्रोतुं इच्छन्तः तं परिवव्रिरे । प्रार्थयामासुश्च—सूत, महामुने, वयमत्र महान्तं क्रतुं कर्तुमभिलषामः । क्रतुश्च बहुवर्षसाध्य इति हेतोः मध्येमध्ये पशुपतेः परमेश्वरस्य कथां श्रोतुमिच्छामः । परमेश्वरस्यावासस्थानं प्रियतमं च काशीति शृणुमः । तथैव दक्षिणभारते श्वेतारण्यं, पञ्चनदं, गौरीमायूरं, मध्यार्जुनं, च्छायावनं-श्रीवाञ्छ्यमिति षट् स्थलानि च काशीकल्पानीति श्रूयते । तत्र

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

गौरीमायूरमिति स्थलमुद्दिश्य कथां शुश्रूषामहे । तस्य स्थलस्य तन्नाम कथं जातं? तत्पूर्वं किं नामाभवत्? किमर्थं गौरी मयूरी अभूत्? किमर्थं तथा तपोऽतप्यत? परमेश्वरः तां कथमवाप? इत्यादिकां कथां वदतु भवान् । परमशिवभक्ताः वयं भक्त्या श्रद्धया च तां शृणुमः इति ।

तच्छ्रुत्वा भगवान्सूतोऽपि अभयाम्बिकां मयूरनाथं च ध्यात्वा प्रणिपत्य कथामेतां कथयितुमारेभे । मुनीन्द्राः! पुरा सृष्ट्यारम्भात्पूर्वं महान्प्रलयः समजनि । तीव्रेण वेगेन वायुरवहत् । आकाशात् पतितैः उल्काशतैः भूमिरतपत् । चत्वारस्समुद्रा अपि स्वजलेन तैलेनेव अनलं अवर्धयन् । सर्वत्र अन्धकारः प्रासरत् । सूर्याचन्द्रमसौ अस्तमगच्छताम् । एवं भयङ्करः प्रलयः सर्वमप्यनाशयत् । सर्वत्र शून्यतैवादृश्यत ।

समयेऽस्मिन् परमेश्वरस्य करुणया कोटिसूर्यप्रतीकाशः अण्डएकस्समदृश्यत । तस्माद्धिरण्यगर्भ उदियाय । स्वस्मादृते न किमपि संलक्ष्यते, किं कारणमिति जिज्ञासुस्तपोऽतप्यत । बहुतिथिषु कालेषु गतेषु, परमेश्वरः तत्पुरस्तादाविर्बभूव । स एव कस्मिंश्चिदवसरे शर्मनान्मार्कण्डेयमरक्षत् । क्षीराब्धेर्मथनसमये, सुधायाः पूर्वं हालाहलमुदजृम्भत । तेन तीव्रेण विषेण न केवलं ब्रह्मविष्ण्वादयः लोकपालाः परन्तु शतमखादिदेवाः असुराश्च अदह्यन्त । तदानीं स एव भगवान्परमेश्वरः तद्विषभोजनेन तानरक्षत् ।

कदाचित्स शिवः केवलो भूत्वा सर्वानपि लोकान्वीक्षमाणआसीत् । तदा दैत्यास्सर्वेऽपि धातारमधिकृत्य तीव्रं तपश्चक्रिरे ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तेषु दैत्येषु प्रधानभूतास्त्रिपुरा अवर्तन्त । ते अजेयास्संवृत्ताः । अतः निखिलानप्यादितेयान्निर्जित्य स्वः आत्मसादकुर्वन् । ते आकृत्या पुररूपा अपि बलेन अजेयास्सन्तः, आकाशे तत्र तत्र चरित्वा त्रीनपि लोकानपीडयन् । तेन धातृहरिशतक्रतुप्रमुखैर्लेखैः प्रार्थितो भगवा-न्परमेश्वरः त्रिपुरैस्साकं युद्धं कर्तुमैच्छत् । भूमिः रथोऽभवत् । सूर्याचन्द्रमसौ चक्रेऽभवताम् मेरुं धनुः कृत्वा, धातारं यन्तारं प्रणीय, वासुकिं ज्यां, तत्र हरिं शरं च कृत्वा युद्धाय प्रायतत परमेश्वरः । तदा सर्वेऽपि रथादयः मेनिरे "स्वेनैव त्रिपुरवधः क्रियत" इति । एतत् ज्ञात्वा परमेश्वरः अट्टहासमकरोत् । तस्मान्निर्गतः वह्निः न केवलं त्रिपुरान् किन्तु सर्वेषां रथादीनां गर्वमपि अदहत् । एवं विनायासेन त्रिपुराजयत् । स एव साक्षात्परमेश्वरः । एवंभूतं महा-महिमवन्तं परमेश्वरं अधिकृत्य ब्रह्माण्डादुद्भूतः चतुर्मुखः तुष्टाव—परमेश्वर! ब्रह्माण्डादुत्पन्नोऽहं जलादृते न किमपि पश्यामि । किं करवाण्यहम् । आदिश्यतामिति । तदानीं वृषभारूढः गिरीशः तत्पुरतः प्रादुर्भूय गगनगिरा प्रोवाच चतुर्मुख, भूलोके चोलमण्डले मायूरमिति नाम्ना प्रथितं मम निवासस्थलमस्ति । तत्र गत्वा कावेर्यां स्नात्वा मल्लिङ्गं प्रतिष्ठाप्य, पूजयित्वा च तपस्यां कुरु । तत्र तव शक्तिः क्रियाशक्तिश्च भविष्यति । तत्रत्यः तीर्थोऽपि त्वन्नाम्ना ख्यातो भविष्यति इति । तच्छ्रुत्वा विधाता परं प्रहृष्टः गगन-गीरुक्तप्रकारेण सर्वं कृत्वा जगत्सृष्टिकरणे महतीं शक्तिमवाप्नोत् । एतादृशमहिमवदेव तत्क्षेत्रमिति सूतमुनिः प्राह ।

॥ इति प्रथमस्तरङ्गः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ अथ द्वितीयस्तरङ्गः ॥

चतुर्मुखो ब्रह्मा पूर्वं जगत्सृष्टेः, स्वसहायार्थं सनकादीन्, दक्षादीन् च मनसोत्पादयामास । तत्र सनकादयः निवृत्तिमार्गमवलम्बमानाः तदुपयुक्तं कार्यमकार्षुः । दक्षादयस्तु प्रवृत्तिमार्गमवलम्ब्य तदुपयुक्तानि कर्माणि अकुर्वन् । एवं जगत्सृष्टेः प्रजापतय एते महान्तमुपकारं ब्रह्मणः कुर्वाणा आसन् । दक्षप्रजापतेः दाक्षायणीति नाम्ना पराशक्तिरेव पुत्रीत्वेन उदभवत् । दक्षोऽपि तां प्रेम्णा भक्त्या च अवर्धयत । दाक्षायणीं तां सतीति जना आह्वयन् । गिरीशः साक्षात्परमेशः तां परिणीयातीव तुतोष । एवं तौ द्वावपि प्राश्वौ जायापती अभवताम् । दक्षः अश्विनीप्रभृतीः अन्या अन्याश्च पुत्रीरुत्पाद्य, ताः देवेभ्यः मनुष्येभ्यः च ददौ । यथा दक्षः, तथैवेतरे प्रजापतयोऽपि प्रजाः तास्ताः उत्पाद्य भुवमिमां पक्षिभिः, प्राणिभिः तथैवेतरैः अन्यैरन्यैश्चराचरात्मकैः पदार्थजालैः सुसम्पन्नममकार्षुः । एवं लोकसृष्टिः पूर्णाऽभवत् ।

एवं सति दक्षप्रजापतेः, "स्वयमेव प्रजापतिः विशेषतश्च परमेश्वरस्य श्वशुरः" इति हेतोः महानहङ्कारः उदभवत् अतः महान्गर्वी संवृत्तः । शिवनिन्दायां मूर्धन्योऽभूत् । विधातृप्रमुखानां दिविषदां पुरत एव शिवनिन्दामकरोत् । "कोऽयं शिवः, सदा भूतप्रेतपिशाचैः परिवृतः नृत्यन्नेवास्ते । न धत्ते वस्त्रम् । केवलं दिग्वासाः, सर्पानेव भूषणानीव दधाति विरूपाक्षोऽयं घोर एव दृश्यते । किं बहुना, विषीदामि कियर्थमस्मै कन्यामदामिति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विष्णुं पश्यत । पीताम्बरधारी किरीटकुण्डलादिभिरलङ्कृतः जामाता इव दरीदृश्यते । विष्णुरयं किं किं नाकरोत् । वेदेषु असुरैरपहृतेषु, अयमेव तानावासयामास । समुद्रमथनसमये महा मन्दरं उत्थापयामास । भूमिमपि हिरण्येनापहृतां पालयामास । हिरण्यकशिपुः कुम्भकर्णः दशास्यः इत्यादिराक्षसान्मारयामास । एवं कियन्तमुपकारं कृतवानयम् । तं विहाय परमेश्वराराधने न किमपि प्रयोजनं भवति । अतः पशुपतये हविर्न दत्त, यज्ञादिषु " इति नानाविधैर्वचनजालैः परमेश्वरमनिन्दत् । एवं दक्षे निन्दति सति देवेषु केचन तमन्वमोदन्त, केचन तं निराकुर्वन् । अनेन कारणेन लोके सर्वेऽपि महर्षयः अध्वरमेव तत्यजुः । यागस्य करणे पशुपतये हविर्दातव्यम् । तच्च दक्षः आक्षिपति । पशुपतये हविर्न दीयते चेदस्माकं शिरः शतधा छिन्नं भवेदिति भगवतो नन्दिकेश्वरस्य शापः । अतः सर्वेषु अध्वरं परित्यजत्सु, दक्षः स्वयमेव तादृशमध्वरं कर्तुमारेभे, यत्र पशुपतये हविर्न दीयेत । हरिविधातृशतमखप्रमुखान् देवान् तदर्थं निमन्त्रयामास । मुनयो, महर्षयो, ब्राह्मणाश्च समाहूताः । परन्तु नैव परमेश्वर माह्वयत् । निमन्त्रितास्सर्वेऽपि परमेश्वरमदृष्ट्वा भीतभीता अवर्तन्त । यज्ञे प्रारभ्यमाणे, दाक्षायणी कैलासशिखरासीनं पशुपतिपतिमुपेत्य प्रार्थयत - नाथ, " अनाहूतोऽध्वरं गच्छेदि " ति रीत्या अनाहूताप्यहं अध्वरं गन्तुमिच्छामि । मम पितरौ मह्यं स्वागतं कुर्यातामेवे" ति । परमेश्वरः भवान्या वचनं श्रुत्वा किञ्चिदिव निमील्याक्षीणि ध्यात्वा पुनरुवाच - " प्रिये, त्वदिच्छया प्रेषयामि त्वाम् । यदि त्वं तत्रापमानिता भविष्यसि चेदत्रागमनं नोचित "मिति । दाक्षायणी नन्दिनं पुरस्कृत्य प्रतस्थे ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एतदन्तरे यजमानः दक्षः पशुपतये हविः नादात् । तदा दधीचिः धैर्येण तमब्रवीत् - दक्ष, धातृहरिवृत्रहप्रमुखेषु निखिलेषु देवेषु मूकेषु, त्वं धैर्येण शिवापमानं निन्दां च करोषि । शिव-निन्दकः कदापि न शिवाय कल्पते । नायं शिवः साधारणो देवः, किन्तु महादेवः, । पश्यतो विष्णोरेव, धातृमुखं नखरै-रेवाच्छिनत् । "को वा ईश्वरः, इतीमं विषयमधिकृत्य एतयोः ब्रह्महर्योः कलहायमानयोः सतोः, महेशः आपातालाकाशं ज्योति-र्भूत्वा, तयोर्मध्ये आविरासीत् । ब्रह्मा विष्णुश्च कलहं परित्यज्य तस्य ज्योतिषः शिरः पादौ च अन्वेष्टुं प्रायतेताम् : ब्रह्मा हंसारूढः शिरः अन्विष्यति स्म, विष्णुः वराहो भूत्वा तत्पादौ । द्वावपि तं तं भागमन्वेष्टुमशक्तौ प्रतिनिवृत्तौ । तत्रासत्यभाषी ब्रह्माऽपि अदण्ड्यत । एतादृशं महामहिमवन्तं परमेश्वरं निन्दसि-अपमनुषे चेत्तवापि दण्डो दीयत एव । एतच्छ्रुत्वा दक्षः अन्त-र्भीतोऽपि बहिर्धैर्यवानिव वेदविरुद्धं तत्कार्यं कुर्वन्नेवास्त ।

॥ इति द्वितीयस्तरङ्गः ॥

॥ अथ तृतीयस्तरङ्गः ॥

कैलासगिरेः प्रस्थिता सती स्वपितुः कार्यं सर्वमपि वेदविरुद्धं स्वनाशकरं चेति अबोधत् । तथापि स्वपितरं तस्मात्कार्यान्निवर्त्य रक्षितुकामैव यज्ञशालामगच्छत् । तत्र विष्णोः प्राभवं, शिवनिन्दा चादृश्यत । किंकर्तव्यमूढा सा तत्र तत्र शनैश्शनैः गच्छति स्म ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तदानीं अन्तर्यामी परमेश्वरः तन्मनसि प्रोवाच–' देवि, त्वदर्थमेव तव पित्रा कृतमवमानं सहे । यदि त्वमपि तव सभायामवमता भविष्यसि चेत् तव पितरं रक्षितुं त्वमपि न शक्ष्यसि'' इति । पितृवत्सला दाक्षायणी च यागशालां प्राविशत् । तत्रत्याः सर्वेऽपि भयाकुलास्सन्तः परस्परमपश्यन् । दक्षस्तु सभामागतायै परदेवतायै स्वपुत्र्यै अक्रुध्यत् । तस्याक्षिणी रक्तेऽभवताम् । प्रणतां तां नाभाषत, नाशिषमदात् । एवमवमताऽपि दाक्षायणी स्वमातरमनमत् । साऽपि न समलपत् । एकोनषष्टिं स्वसोदरीश्च दृष्ट्वा दाक्षायणी हर्षपरवशा जहास । ताश्च, न प्रतिवचनमदुः । यस्याः परमेश्वर्याः कटाक्षेण सर्वे सुखिनः धनिनश्च भवन्ति, सेदानीं स्वबन्धुभिरेव तिरस्क्रियते । अहो विधेर्विडम्बना । ताः न केवलं समलपन्, परन्तु पर्यहसन् च । "कन्यकायाः परिणीतायाः गौरवं पत्यैव भवति न पितृभ्याम् । पतिः धनिकः सर्वैश्वर्यसम्पन्नः यदि भवेत् तदा परिणीतकन्यका महता गर्वेण वक्तुं शक्नोति । अस्याः पतिः आदिभिक्षुकः । श्मशाने वसेत्, भूतप्रेतपिशाचादिभिः नृत्येत् । तादृशस्य पत्युः पत्नीयं किं वा गौरवं प्राप्तुं शक्नोति । महानया, कृते भाषणे, अस्माकमेव गौरवहानिस्स्यादि''ति । एतादृशानसम्बद्धप्रलापान् श्रावं श्रावं परमकुपिता पराशक्तिः तत्रत्यान्हरिविधातृवृत्रहप्रभृतीनादितेयान्वीक्ष्य, प्राह–"भवन्तोऽपि धर्मविरुद्धमिदं कार्यं द्रष्टुं, हविरादातुं चागता इति जिह्रेमि । अपराधसाक्षिणोऽपि अपराधभागिनः दण्डनीया भवन्ति । मम पतिः रुद्रः, यदि क्रुद्धश्चेत् जगदिदमपि नाशयितुं शक्नोत्येव, यज्ञनाशे किमु पृथक्तया वक्तव्यमस्ति'' इति ।

एवं दाक्षायण्याः उपदेशात्मकं वचनं श्रुत्वापि न कोऽपि चचाल । परमक्रुद्धा परा देवता, पश्यतामेव विधिहर्यादिदेवानां, स्वदेहं

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

योगाग्नौ जुहाव । तद्दृश्यं दर्शं दर्शं शतमखप्रमुखा देवाः किं कर्तव्यतामूढाः "किं वा भविष्यती"ति आलोचयन्त विभ्यति: स्म । विष्णुः क्रियमाणं मखं परित्यज्य, यथाविधि यज्ञः क्रियतामिति दक्षं उपदिदेश ।

एतदन्तरे शक्त्या विहीनश्शम्भुः कोपस्य परां काष्ठामभजत् । क्रुद्धः सः स्वजटया भूमिमताडयत् । तदा लोकास्समस्ताः चेलुः । तस्मात्प्रदेशात् रुद्रांशो वीरभद्रः प्रादुर्भूय, परमेश्वरं प्रणम्य, "आदिश्यतां भगवन् किं करवाण्यह"मिति ब्रवीति स्म । परमेश्वरः आदिशत्तम् – "दक्षयज्ञः नाश्यतां, तत्र ये ये भागिनः वर्तन्ते तेऽपि अभागिनः क्रियन्ता"मिति । वीरभद्रोऽपि पाशुपतैर्भूतगणैः परिवृतः शिवाज्ञां शिरसि कृत्वा दक्षस्य यागशालां प्रति प्रतस्थे । रुद्रमिव क्रुद्धं वीरभद्रं दृष्ट्वा तत्रत्यास्सर्वेऽपि तत्रसुः । तत्र यागाग्निः रुद्रस्याङ्गमिति क्षान्तः । धातुश्शिखा छिन्ना सती गगने उदडयत । विष्णुः श्रीनिवासोऽपि ह्रीनिवासोऽभूत् । शतमखादयः प्रहारजनितां पीडां असहमानाः अमरत्वं निनिन्दु. । इनो दन्तहीनस्संवृत्तः । वायुः मनोवेगेन अधावत् । महर्षयस्सर्वेऽपि वीरभद्रं शरणमगच्छन्, प्रार्थयन्त च 'प्रभो ! क्षम्यता'मिति । दक्षस्य शिरश्छिन्नमधः पपात । स्त्रियः, वृद्धाश्च भयानकं दृश्यं दृष्ट्वा मुमूर्छुः । अन्ततो गत्वा, मानवाः, महर्षयः, शिष्टा विशिष्टाः सर्वेऽपि परमेश्वरं शरणमुपागताः नानाविधैस्स्तुतिशतैस्तुष्टुवुः । करुणानिधिः भगवान् परमेश्वरः तेषां पुरतः प्रादुर्भूय गम्भीरया वाचोवाच–"देवाः, अभयं दत्तम् । मृता जीवन्तु । दक्षोऽपि अजशिरो धृत्वा जीवतु । प्रकृतिस्थाः भवत । परित्यजताहङ्कारम् । स्मरत "सर्वेषामुपरि कश्चन वर्तत" इति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

धर्म्यात्पथः मा विचलत । कार्यान्तरकरणाय व्यवस्यत : शुभं भूयादिति'' उक्त्वा तिरोबभूव । सर्वेऽपि स्वस्वस्थानं उपगताः ।

॥ इति तृतीयस्तरङ्गः ॥

॥ अथ चतुर्थस्तरङ्गः ॥

पुरा कदाचित् कैलासशिखरे रम्ये बिल्वाटवीमध्ये सिद्धासनमध्यासीनः परमेश्वरः स्वभार्यया भवान्या सह संल्लपन् आसीत् । कालश्च वसन्तः स्वप्रभावं सर्वत्र दर्शयति स्म । तदा भवानी भवमुवाच—''भगवन् ! सर्वे वेदाः भवन्निश्वासभूताः मानवानामभ्युदयाय प्रादुरभवन् । तत्रोक्ताः पदार्थाः लोकेऽपि सन्ति, लोकेऽविद्यमानाः पदार्थाः वेदेऽपि न सन्तीति वदन्ति । तथा च वेदे सर्वेऽपि पदार्थाः प्रोक्ता इति प्राञ्चः प्राहुः । तमेवार्थं पुराणादीनि, धर्मसूत्राणि, ब्रह्मसूत्राणि, गृह्यसूत्राणीति नानाविधानि ग्रन्थजालानि प्रतिपादयन्तीति विश्वमिमः । एवं चतुष्षष्टिकलाः वेदमनुवदन्ति । तत्र प्रायश्चित्तविधिरपि प्रोक्तः । यदि कश्चित् कायेन मनसा वाचा पापं करोति चेत्तदपोहनार्थं विधयः श्रूयन्ते परिहारभूताः । तथा चाहं पापभाक् संवृत्तेति मन्ये । यतः भवान् वीरभद्रमुखेन अवधीत् मम पितरम् । तस्य च कारणं तत्पुत्रीभूताऽहमेव । अतः यं कञ्चन प्रायश्चित्तं कृत्वा, निष्पापा त्वां प्राप्तुमिच्छामि । उपायं कञ्चन वदतु भवानि''ति ।

तच्छ्रुत्वा भवानीपतिः स्मितपूर्वमब्रवीत् ''प्रिये, त्वदुक्तं सर्वं सत्यमेव । वदामि कंचनोपायम् । अहं शुद्धस्फटिकसङ्काशोऽपि

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नीलकण्ठः इति आख्याये । समुद्रमथनकाले क्षीराब्धेर्हालाहलं नाम तीव्रं विषमुदभून् । तेन लोकास्सर्वेऽदह्यन्त । तद्रक्षार्थमहं तद्भुक्त्वा कण्ठेऽधरम् । तेन मम कण्ठः श्यामोऽभूत् । अतः त्वमपि नीलकण्ठी भूत्वा वक्ष्यमाणे क्षेत्रे वक्ष्यमाणप्रकारेण तपश्चर । इदानीमहं मम नाम्नां प्रभावं संक्षेपेण वदामि । शृणु —

पुरा कश्यपप्रजापतेः दितिरदितिरिति द्वे भार्ये आस्ताम् । दितेः पुत्राः दैत्याः, अदितेः पुत्रा आदितेयाः इति कथ्यन्ते । तानेव देवा असुरा इति सङ्ग्रहेण कथयामः । ते भ्रातृभावाद्धेतोः स्वर्गमाधिकृत्य परस्परमयुध्यन्त । कदाचिद्देवाः, कदाचिदसुराश्चाजयन् । तेन देवानामसुराणां च मृत्युभयमजायत । तत्परिहाराय कपटनाटकसूत्रधारेण विष्णुना बोधिताः देवासुराः सममेव क्षीराब्धिं मथित्वा पीयूषं प्राप्तुं प्रायतन्त । कल्पवृक्षाः, ऐरावतो नाम गजः उच्चैःश्रवा नाम हयः, कौस्तुभादीनि बहूनि रत्नानि, रम्भाप्रभृतयः, अप्सरसः, शीतशीतश्चन्द्रमाः, श्रीः, हलाहलाख्यं विषं, एवंभूतानि वस्तूनि समुद्रादाविरभूवन् । इन्द्रः, विष्णुः, देवाः, सर्वेऽपि असुरान् वञ्चयित्वा तानि स्वयमकुर्वन् । अगिलमहमपि हलाहलम् । अन्ततो गत्वा सुधा प्राप्ता । तां प्राप्तुमहमहमिकया अधावन् देवासुराः । जिष्णुः विष्णुरयं स्त्रीवेषं परिगृह्य, सर्वानपि वशीकृत्य देवेभ्य एवामृतमदात् । असुरास्सर्वेऽपि वञ्चिता अभवन् । अतः इदानीमपि देवानामसुराणां च वाक्कलहः अनुस्यूत एव वर्तते । कदाचिन् त्रिपुरा नाम विक्रान्ता असुराः देवादीनजयन् । अहमेव लीलया हासेनैव अवधिषम् तेनाहं त्रिपुरान्तकः संवृत्तः । सागराणामुद्धरणाय

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भगीरथः भागीरथीमानयत् । तदर्थं तद्वेगशमनाय तां गङ्गामहम-धरम् । तेन मम गङ्गाधर इति नाम जातम् । अहमेव ब्रह्माण्ड-मिममसृजम् । ब्रह्माण्डश्च ममाङ्गमेव । तमाच्छादयितुं को वा समर्थः । आतश्चाहं दिग्वासास्संभूतः । मम त्रीणि अक्षीणि वर्तन्त इति विरूपाक्षः, त्र्यम्बकः इति मम नाम । चन्द्रः कलावान् किल । तस्य सम्भावनयाहं कलामेकां धरामि । तेनाहं चन्द्रशेखरस्संवृत्तः । सर्वेषामपि मानवादीनां रोगानहमपहरामि इति कृत्वा मां वैद्यनाथं वदन्ति ।"

"दाक्षायणि ! त्वयाऽपृष्टा अपि बहवो विषया मया कथिताः । किमर्थं? त्वयि ममाभिनिवेशः महानिति । अतो ब्रवीमि—चोलदेशे-ब्रह्मवनं नाम महत् क्षेत्रं वर्तते । अस्य पश्चादेव त्वन्नाम्ना मायूर-मिति नाम भविष्यति । अस्मिन्स्थले मल्लिङ्गं प्रतिष्ठाप्य, तत्र प्रवहन्त्यां सह्यजायां त्रिषवणं स्नात्वा, विधाता मामपूजयत् । महत्त-पश्चचार । तेन जगत्सृष्टिक्रममजानात् । तेन तस्य स्थलस्य ब्रह्मवनमिति नाम । त्वमपि मयूरीभूत्वा तत्क्षेत्रं गच्छ । यथा-विधि ब्रह्मतटाके, सर्वपापविमोचिन्यां कावेर्यां च स्नात्वा, मल्लिङ्गं पूजय, तपश्च तीव्रं कुरु । अहमपि हरिप्रमुखैर्देवैस्सह तत्र वृषभा-रूढस्सन् वत्स्यामि । यदा समयः परिणतो भविष्यति तदा त्वां स्वीकरिष्यामि" इत्युक्त्वा विरराम ।

तच्छ्रुत्वा भवानी भावशबलिता सती मयूरवेषं धृत्वा मयूरीभिः स्वसखीभिस्सह ब्रह्मवनं गन्तुमुदडयत । गगने डयमाना गौरी स्व भर्तुर्निवासस्थानं स्मरणमात्रेण मोक्षदायकं काशीक्षेत्रमद्राक्षीत् । क्षेत्र-मिदं देवा अपि सदा स्मरन्ति, नमन्ति च । तत्रैव भागीरथी

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उत्तरवाहिनी सती प्रवहति । प्रलयकालेऽपि सा काशी न नश्यति । तत्र बहुभिः प्रपूजितानि बहूनि लिङ्गानि बहुधा दरीदृश्यन्ते । इदानीं तत्र नानाविधैराभरणैराभूषिताः स्त्रियः परमेश्वरं तुष्टुवुः प्रार्थयामासुश्च ।

"प्रभो महादेव, वयमुत्तरभारते प्रवहन्त्यः गङ्गायमुनाप्रभृतयः पुण्यनद्यः । वयं मज्जतां मानवानां पापानि अपहृत्य तेभ्यः पुण्यमेव दद्मः । एतेन वयं पापधारिण्यो भवामः । समुद्रोऽपि पापेन श्याममुखीः नः दृष्ट्वा पराङ्मुखो भवति । अतः प्रार्थयामहे नः पापविमोचनस्य को वा उपाय" इति । तच्छ्रुत्वा परमेश्वरः प्राह— "नद्यः, भूलोके चोलावन्यां ब्रह्मवनं नाम महत्क्षेत्रं वर्तते । तत्र कावेरी नाम पुण्यनदी प्रवहति । सा ब्रह्माणमुद्दिश्य तीव्रं तपश्चकार । धाता च प्रत्यक्षीभूय तस्यै वरमदात् – "सह्यजे, त्वं न केवलं मानवानां, किन्तु नदीनामपि पापं हर्तुं शक्नुयाः । परन्तु त्वयि किञ्चिदपि पापं न लगेत्" इति तेन सर्वपापविमोचनी कावेरीति कथ्यते । तस्यां सदा, विशेषतश्च तुलामासे स्नानं कुरुथ, पापं च त्यजथ" इति । उपायमिममाकर्ण्य सर्वा अपि नद्यः प्रमुदिताः कावेरीं प्रति प्रस्थिताः । ता अपि मयूर्या गौर्या सह गगने उड्डयमानाः सममेव तद्ब्रह्मवनं जग्मुरिति चतुर्थस्तरङ्गः ।

॥ अथ पञ्चमस्तरङ्गः ॥

तरङ्गेऽस्मिन् गौरी मायूररूपं धृत्वा, कावेर्यां त्रिवारं स्नात्वा स्वसूच्या ब्रह्मवनस्थानि कुसुमानि आनीय तत्रत्यं लिङ्गं पूजयामास ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्पुरतः स्तोत्राणि प्रोच्यानृत्यत् । दृश्यमिदं द्रष्टुं स्वः सुमनसस्सर्वेऽपि महेन्द्रं पुरस्कृत्य तत्रागताः । मयूरवेषं धृत्वा तत्र तत्राम्रादिवृक्षेषु अवसन् । विष्णुः पूर्वमेव महेश्वरेणागत्य तत्रावसत् । अंशेन मयूरो भूत्वा तद्वेषधारिणा शिवेन सह नृत्यति स्म । यदा देवास्सर्वेऽपि तत्क्षेत्रे न्यवन् तदा तदङ्गना अपि मयूरीभूतगौर्या सह तत्रावसन्: गौरीवरीवस्यामकुर्वन् च । गौरीपुत्रौ गणेशः कुमारश्च तत्रागतौ पितरौ असेवेताम् । किं बहुना, ब्रह्मवनं सर्वमपि देवानामावास-भूतत्वात्त्रिदशालयः संवृत्तम् ।

एतदन्तरे वर्षाकालस्समायातः । गगने जलदा अदृश्यन्त । जलदेषु विद्युतः लता इव प्राकाशन्त । वर्षश्च भयानकस्संवृत्तः । नद्यां प्रवाहः महता वेगेन प्रावहत् । तदानीं मयूरास्सर्वेऽपि सन्तुष्ट-मनसः अनृत्यन् । तत्र पार्वतीपरमेश्वरयोः नर्तनमतीव मोदावहं मोक्षावहं चाभवन् । तद्दृश्यं दर्शं दर्शं त्रिभुवनस्थिताः चराचरा-त्मकाः सर्वेऽपि कूतुहलिनोऽभूवन् ।

तदन्तरे तारकशूरपद्मप्रभृतयः महासुराः लीलयैव स्वर्गमाक्रम्य त्रिलोकीमपीडयन् । सत्यलोके धाता नादृश्यत, वैकुण्ठे च विष्णुः । इत्येवं सर्वत्रापि सर्वेऽपि नासन् । इत्येवं ब्रह्मवनं ब्रह्माण्डकल्पम-भवत् । एतद्दृष्ट्वा भगवान्परमेश्वरः तारकादिवधे कुमारं नियुज्य निश्चिन्तोऽभूत् । कुमारोऽपि देवसेनापरिवृतः सेनानीर्भूत्वा तदसुरैस्सह युद्धमकरोत् । स्वयं कुमारोऽपि विक्रान्तैर्महासुरैः प्रयुध्य तान्सर्वानपि हन्ति स्मेति आश्चर्यमिदम् । तेजसां न वयः समीक्ष्यते हि । तेन विधिहरिहरादयः सर्वेऽपि सन्तुष्टास्तं कुमारं प्राशंसन् ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्र वसन्तस्समजनि । सर्वेऽपि वृक्षाः पुष्पिताः फलिताश्चादृश्यन्त पिकाः अकूजन्, मयूराः अनृत्यन् । मलयमारुतः मन्दं मन्दं ववौ । भगवान् परमेश्वरोऽपि पार्वतीसमागमस्य समयः समायातइति मत्वा सर्वेषां देवानां पुरत एव तां स्वीचकार । पापहीनाः गङ्गायमुनाप्रभृतयः पुण्यनद्यः, शत्रुहीनाः विधिहरिहरिहयप्रमुखाः निखिला देवाः सत्या सङ्गतं सहासं वृषभारूढं तं मयूरनाथमस्तौषुः । ततः परं सर्वेऽपि स्वस्वस्थानं प्रायुः । एवं मयूरक्षेत्रे अभयाम्बिकासमेतमयूरनाथः विजतेतमामिति शम् ।।

।। इति पञ्चमस्तरङ्गः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

முகவுரை

கவிஞர்களின் கற்பனை வெளிப்பாடே காவியமாகும். இந்தக் காவியங்கள் யாவரும் கண்டு மகிழும் வண்ணம் அமைக்கப் பெற்றவை. இவை த்ருச்யகாவ்யம், ச்ரவ்ய காவ்யம் என்று இரண்டு வகைப்படும். ச்ரவ்ய காவ்யத்தில் மகாகாவியம் கண்டகாவியம், கீதகாவியம் என்று மூன்று பிரிவுகள் உண்டு. அவற்றிலும் மஹாகாவியம், பத்திய காவியம், கத்திய காவ்யம், கத்யபத்ய காவ்யம் (சம்பூ காவ்யம்) எனப் பிரிக்கப்பட்டுள்ளது. இம்மூன்று வகைக் காவியங்களுள் செய்யுளும் உரைநடையும் விரவியுள்ள காவியமே "சம்பூ காவ்யம்" என்று பெயர் பெறும்.

செய்யுளும், வசனமும் கலத்தலாகிய வேறுபாட்டைத் தவிர சம்பூ காவ்யம் பிற காவ்யங்களின் இலக்கணங் களில் இருந்து வேறுபட்டதல்ல. படிப்பவர்களுக்கு வருணிக்க இயலாத ஓர் இன்பத்தைப் பயப்பதே காவியத்தின் நோக்கம். கதையின் போக்கினாலும், வர்ணனையினாலும் கவிகளினால் புகுத்தப்பட்ட உரையாடல்களாலும் காவியம் கற்போர்க்கு இன்பமூட்டு கின்றது. இந்த இலக்கணம் சம்பூ காவியத்திற்குப் பொருந்தும்.

தமிழில் இயல், இசை, நாடகம் என்ற துறைகளில் எழுந்த பல இலக்கியங்களைப் போல் சம்ஸ்கிருத மொழி யில் கத்யம், பத்யம், சம்பூ, நாடகம் போன்ற வகைகளாகப் பற்பல இலக்கியங்கள் தோன்றின. அங்ஙனம் புகழ் பெற்ற காவியங்களில் "கௌரீ மாயூர மாஹாத்மிய சம்பூ" என்ற நூலும் ஒன்றாகும்.

CC-0 Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

II

ச்ரவ்ய கத்ய காவ்யங்கள்

ஸம்ஸ்கிருத பாஷையில் கத்ய காவ்யம் மிகச் சிலவே ஆகும். அவை ஆக்யாயிகை, கதை என இரு வகைப்படும். என இலக்கணக்காரர்கள் கூறுவர். ஆயினும் அவ்விலக்கணப்படி இவை ஆக்யாயிகை, இவை கதை என வரையறுத்தல் இயலாது என்பர். அவை தண்டி இயற்றிய தசகுமார சரிதம், சுபந்து இயற்றிய வாசவதத்தை, பட்ட பாணன் இயற்றிய ஹர்ஷ சரிதம், காதம்பரீ. தனபாலனின் திலக மஞ்சரி, வாதீப சிம்மனின் கத்ய சிந்தாமணி, வாமன பட்டபாணனின் வீர நாராயண சரிதம் முதலியன.

ச்ரவ்ய சம்பூ காவ்யங்கள்

கத்யம், பத்யம் இரண்டும் கலந்து நிற்கும் காவியங்களுக்குச் சம்பூ காவ்யம் என்று பெயர். முதன் முதலில் அதற்கு வழிகாட்டிகள் ஜைனரோ என்ற ஐயம் நிகழ்கின்றது. ஏனெனில் தற்போதுள்ள சம்பூ காவ்யங்களுள் முதலில் இயற்றப்பட்டது 'ஜீவந்தர சம்பூ' ஆகும். இதை இயற்றியவர் ஹரிசந்திரன். அதன்பின் பல சம்பூ காவ்யங்கள் இயற்றப்பட்டன. அவை விக்ரமபட்டரின் நள சம்பூ (தமயந்தி கதை) சோமஸூரியின் யசஸ் திலக சம்பூ, போஜனின் போஜ சம்பூ (ராமாயண சம்பூ) அநந்த பட்டரின் சம்பூ பாரதம், வேங்கடாத்வரியின் விச்வகுணா தர்ச சம்பூ, ராமானுஜாசார்யரின் ஸ்ரீராமானுஜ சம்பூ, நீலகண்ட தீக்ஷிதரின் நீலகண்ட விஜய சம்பூ, வெங்கடேச கவி இயற்றிய ஸ்ரீனிவாச விலாச சம்பூ, திருமலாம்பாவின் வரதாம்பிகா பரிணயசம்பூ, சிரஞ்ஜீவி கவியின் மாதவ சம்பூ முதலியனவாகும்.

அப்பாத்வரி என்னும் இந்நூலின் கவி தனக்கு சிவபெருமானிடம் உள்ள பக்தியை 'கௌரீ மாயூர மாஹாத்மிய சம்பூ' என்னும் நூலின் வாயிலாக மாயவரம்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(மயிலாடுதுறை) என்று பெயர் வரக் காரணம் என்ன என்பதைச் செய்யுளும், உரைநடையும் கலந்த சம்பூ காவிய வடிவில் வெகு அழகாக இந்நூலில் எடுத்தியம்பி யுள்ளார்.

கவியின் வரலாறு

இந்நூலாசிரியரான 'அப்பாத்வரி' ஸ்ரீவத்ஸ கோத்திரத்தைச் சேர்ந்தவர் என்பதும், மயிலாடுதுறை (மாயவரம்) [illegible] செல்லும் வழியில் உள்ள கீழையூர் கிராமத்தவர் என்பதும், சிதம்பரமகின் என்பாரின் மகன் என்பதும் கீழ்வரும் ச்லோகத்திலிருந்து தெரிகிறது.

[1] तातो यस्य चिदम्बरेश्वर इति प्रख्यात नामा मखी-
यद्रात्रिन्दिवदत्तहव्यनिवहा दानैककृत्यास्सुराः ।
श्रीवत्सान्वयवारिधीन्दुरवसत् किलियूर्नामनि
श्रीमान्विश्रुतकीर्तिरार्द्रहृदये पुण्येऽग्रहारे सुधीः ।।

[2] श्रीमच्चिदम्बरमखीन्द्रसुतेन वत्स-
वंशाम्बुराशिविधुना विधिशास्त्रमार्गे ।
सञ्चारनिर्मलधिया सकलार्थबोध-
माचारसारनवनीतमिदं गृहीतम् ।।

இவர் ஷாஜி மன்னரின் ஆஸ்தான கவிஞர்தான் என்பதும் கீழ்வரும் ச்லோகத்திலிருந்து தெரியவருகிறது.

[3] श्रीशाहक्षितिपालनायकदयादत्तान्नभोगोल्लस-
द्बुद्ध्युत्कर्षविभावितश्रुतिबहुस्मृत्यर्थसारोदयः ।

1. மதனபூஷணபாணம் B. No. 10653. D. No. 4585.
2. ஆசார நவநீதம் B No 9320. D. No. 18048.
3. ஆசார நவநீதம் ,, ,,

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सभ्यानां प्रमदाय सर्वविषयान्धर्मान् रहस्योत्तरान्
संगृह्णामि मितैः पदैरधिवसं मायूरमप्पाध्वरी ।।

एकक्ष्मापतिपूर्वपुण्यसुकृतोत्कर्षेण लब्धोदयो
दीपाम्बोदरगर्भवासमहिमप्रख्यातपुण्योदयः ।
श्रीशाहक्षितिराट् प्रशास्तु वसुधामाचन्द्रमप्पाध्वरी
यद्दत्तान्नबलेन धर्मविषयं शास्त्रं समग्रन्थयत् ।।

சகஜீ ராஜனின் மந்திரியான திரயம்பகராயமகி கி. பி. 1696வது தாத்ரு வருடத்தில் நடத்திய மகாயக்ஞத்திற்குத் தன்னை அழைத்துக் கொண்டனன் என்றும், அந்த யக்ஞம் கும்பகோணம் செல்லும் வழியிலுள்ள சுவாமிமலை என்றவிடத்தில் நடந்ததென்றும், திரயம்பகராயன் மற்றும் மகாராஷ்டிர ராஜன் இவரை விடுவதற்கு மனது ஒப்பாமல் ராஜ ஆஸ்தானத்தில் மூன்று மாதம் 'மகாபாரதம்' பாராயணத்தைச் செய்யவேண்டுமென்று பிரார்த்தித்துக் கொண்டதின் பேரில் பாராயணத்தை முடித்து மாயவரத்திற்குத் திரும்பும்போது சகஜி மன்னன் ஒரு தர்ம சாஸ்திரத்தை எழுதவேண்டும் என்று கேட்டுக் கொண்டதின் பேரில் ஆகட்டும் என்று ஒப்புதலளித்து ஊருக்கு வந்து தன்னுடைய புதல்வனுடன் எட்டு சர்க்கங்களில் 15,000 கிரந்த பரிமாணமுள்ள ஒரு தர்ம சாஸ்திர புத்தகத்தை எழுதி சகஜ மன்னனுக்குக் கொடுத்தார் என்றும் அதனை 'ஆசார நவநீதம்' என்று அழைத்தார்கள் என்றும் கீழ் வரும் சுலோகத்திலிருந்து தெரிய வருகிறது.

* धातृवर्षे यदा यज्ञसेवार्थमहमागतः ।
श्रीमहाराजराजस्य मन्त्रिणस्त्र्यम्बकप्रभोः ।।

---

* Ref. संस्कृतकविचरित्रम् — Kannada Book No 58. T. M. S. S. M L. by M N. Srinivasa Iyangar Page No. 352.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

महाराजस्तु मां प्रीत्या स्वसभायामवासयत् ।
भारतश्रवणार्थाय रात्रिन्दिवमुदारधीः ॥

यदा मासत्रयादूर्ध्वं प्राप्यानुज्ञां महीपतेः ।
गन्तुमिच्छामि च तदा धर्मशास्त्रनिबन्धने ॥

महाराजेन चाज्ञप्तो गौरीमायूरमागतः ।
तस्मिन् वर्षे वृश्चिकार्के धर्मशास्त्रसुधानिधे ॥

एकेनैव मया पुत्रयुक्तेन शनकैः कृते ।
बुद्धिदण्डेन मन्थेन रात्रिन्दिवमनेकदा ॥

अष्टाभिर्लब्धवानस्मि वत्सरैस्तत्फलं महत् ।
आचारनवनीतं तन्मृदु सर्वमनोहरम् ॥

महाराजस्य दयया गत्यं ग्राह्यमभूद्भुवि ।
समाप्तः पञ्चदशभिः सहस्रैर्ग्रन्थसंख्यया ॥

प्रचारोऽस्य महाराजाधीन एव हि सर्वथा ।
अहमप्पाध्वरी नाम्ना महाराजेन सादरम् ॥

दत्तां महीं समादाय तत्र कृष्यादिसंभृतैः ।
धान्यैः परंपरासिद्धे ग्रामे कृष्यासमार्जितैः ॥

कुर्वन् कुटुम्बभरणं पुत्रपौत्रैस्समावृतः ।
श्रेयः प्रार्थमानस्सन्महाराजस्य सन्ततम् ॥

आयुश्शेषं सुखं वस्तुमिच्छाम्यग्निक्रियान्तिके ।
मनोरथो महानेष महाराजेन पूर्यताम् ॥

— आचारनवनीतम्

மேலும் இவர் 1. மதனபூஷணபாணம், 2. கௌரீ மாயூர மாஹாத்ம்ய சம்பூ. 3. ஆசார நவநீதம் (தர்ம சாஸ்திரம்) என்ற மூன்று நூல்களை எழுதியுள்ளார்.

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இவரது காலம் 17-வது நூற்றாண்டின் பிற்பகுதி. ஷாஜி மன்னரை இவர் குறிப்பிட்டிருப்பதிலிருந்து மன்னர் ஷாஜியின் காலத்தைச் சேர்ந்தவர் என்று நன்கு அறிய முடிகிறது. சகஜி மன்னன் ஆண்ட காலம் கி. பி. 1684 முதல் 1710 வரை. இந்நூலாசிரியரான அப்பாத்வரி. இந்நூலை. எழுதும் போது தனக்கு வயது ஐம்பத்திஎட்டு என்று தன் நூலில் குறிப்பிட்டுள்ளார்.

ஒரு கவி பல நூல்கள் இயற்றி இருப்பின் அவற்றின் பௌர்வாபர்யத்தை அறிதற்கு அக்கவியின் மனோநிலை ஒரு சிறந்த காரணம் ஆகும். தன் படிப்பு முடிந்தவுடன் நூல் எழுதத் தொடங்கிய கவியின் மனோநிலைக்கும், சிறிது காலம் கழிந்த பின்னர் உள்ள மனோநிலைக்கும் மாறுபாடு இருக்கும். அக்கவியே வயது முதிர்ந்த நிலையில் இருக்கும்பொழுது அவரது மனோநிலை வேறு வகையாகவே இருக்கும். அவ்வாறு சிறுவயதில் ஒருவனுக்கு உள்ள மனோநிலைக்கும், நடுவயதில் உள்ள மனோநிலைக்கும், வயது முதிர்ந்த காலத்துள்ள மனோநிலைக்கும் மாறுபாடுகள் உள. இவற்றை மனதில் வைத்துக்கொண்டு ஒரே கவி எழுதிய நூல்களுள் எது முன்பு எழுதப்பட்டது, எது பின்பு எழுதப்பட்டது என நிர்ணயிக்கலாம்.

அதைப் போல்தான் இந்நூலாசிரியரான 'அப்பாத்வரி' என்பவர் 'மதனபூஷணபாணம்' கௌரீமாயூரமாஹாத்மிய சம்பூ, ஆசாரநவநீதம் என்ற மூன்று நூல்களை எழுதியுள்ளார். இதை நோக்கும் போது மதனபூஷணபாணம், ஆசாரநவனீதம் என்னும் நூல்களை எழுதிய பிறகே 'கௌரீமாயூர மாஹாத்மிய சம்பூ' என்ற நூலை எழுதியிருக்க வேண்டும் என்ற எண்ணம் தோன்றுகிறது. மேலும் இவர் சிவபெருமானைத் துதித்து எழுதும்போது நெஞ்சு நெகிழும் வண்ணம், பக்திப்பரவசத்துடன் இறைவனை இறைஞ்சும் இடம் மனதை மிகவும் உருக்குகிறது. தனது முதுமையின் காரணமாக மனதார பரமனை நினைத்து

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ஆனந்தப்பட்டு அனுபவித்து எழுதியது என்பது படிப்பவர்களின் மனத்தையும் உருகச் செய்கிறது. அந்த அளவிற்கு இக்கவி நெஞ்சுருகி, வெகு அழகாக ஸ்லோகங்களை மனப்பூர்வமாக பரமனிடம் மனதைச் செலுத்தி எழுதியுள்ளார் என்பதை இவருடைய நூலான 'கௌரீ மாஹாத்மிய சம்பூ' என்ற இந்நூலினைப் படிக்கும்போது உணர முடிகிறது.

மூலச் சுவடி வரலாறு :

உலகப் புகழ் பெற்ற சரசுவதி மகால் நூலகத்தின் சம்ஸ்கிருதப் பிரிவில் மட்டும் சுமார் 40,000 சுவடிகள் உள்ளன. இவை ஓலைச்சுவடிகளாகவும், காகிதச் சுவடிகளாகவும் உள்ளன. இவைகளைத் தவிர கி. பி. 1880க்குப் பின் பலர் இந்நூலகத்திற்கு ஏராளமான சுவடிகளை அன்பளிப்பாக கொடுத்துள்ளனர். இச்சுவடிகள் பலவும் அன்பளிப்பாக அளித்தவரின் பெயரிலேயே தொகுதி வாரியாக வகைப்படுத்தி வைக்கப்பட்டு பாதுகாக்கப்பட்டு வருகின்றன. இவற்றில் 'கௌரீ மாயூர மாஹாத்மிய சம்பூ' என்னும் இந்நூல் பர்னல் தொகுதியில் இடம் பெற்றுள்ள ஓலைச்சுவடியாகும். இந்நூல் கிரந்த எழுத்தில் உள்ளது. இச் சுவடி சுமாரான நிலையில் உள்ளது. எழுத்துக்கள் நன்றாகவும் தெளிவாகவும் உள்ளன. B. No. 10189. D. 4035 உள்ள இந்நூலே தற்போது வெளிவருகிறது.

நன்றியுரை :

இந்த நூலைப் பதிப்பிக்கும் பணியை எனக்கு நல்கிய இந்த நூலக இயக்குநரும், மாவட்ட ஆட்சியருமான திரு. இ. வெங்கடாசலம் இ. ஆ. ப. அவர்களுக்கும், இந்நூலக நிருவாக அலுவலர் திரு. அ. பஞ்சநாதன் எம். ஏ., எம். எல். ஐ. எஸ்., அவர்களுக்கும். இந்நூல் சிறிய பதிப்பாக வெளிவர எனக்குப் பலவகையிலும் உதவி புரிந்த முதறிஞர் ப்ரம்மஸ்ரீ தேதியூர் கிருஷ்ணமூர்த்தி

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

சாஸ்திரிகள் அவர்களுக்கும், மேலும் இந்நூல் வெளிவர பல உதவிகள் புரிந்த திரு. பி. எம். பத்மநாபசர்மா (முன்னாள் வடமொழிப் பண்டிதர்) அவர்களுக்கும் என் உளமார்ந்த நன்றியைத் தெரிவித்துக்கொள்கிறேன். அவ்வப்போது இந்நூல் தொடர்பாகக் கருத்துப் பரிமாற்றம் செய்துகொள்ள உதவிய வடமொழிப் பண்டிதர் திரு. வீரராகவன் அவர்களுக்கும் என் நன்றியைத் தெரிவித்துக்கொள்கிறேன். இதனைச் சிறப்பாக அச்சிட்ட சரசுவதி மகால் நூல்நிலைய அச்சுப் பிரிவிலுள்ள வரனைவருக்கும் எனது நன்றியைத் தெரிவித்துக் கொள்கிறேன்.

இங்ஙனம்,

தஞ்சாவூர்
29—7—94

எஸ். இராஜலெக்ஷ்மி,
சம்ஸ்க்ருத பண்டிதர்.
சரஸ்வதி மகால் நூலகம்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

உ

ஸ்ரீ சிவாய குரவே நம:

ஸ்ரீகௌரீ மாயூர மாஹாத்மிய சம்பூ

(கதைச்சுருக்கம்)

முதல் தரங்கம்

தடையின்றி நூல் முடிவுற வேண்டுமென்பதற்காகக் கடவுள் துதியுடன் 'கௌரீ மாயூர மாஹாத்மிய சம்பூ, என்னும் இந்நூல் தொடங்கப்படுகிறது.

முன்னொரு காலத்தில் தவத்தால், கல்வியால், நடத்தையால் பெரியோர்களான முனிவர்கள் பாதராயணர் முதலிய குலபதிகளைக் கொண்டு இந்திரனின் தலைமையில் ஓர் யாகம் செய்ய விரும்பி தவத்தின் பயனிலும் அதிகப் பயனைத் தரவல்ல நைமிசாரண்யத்தில் ஒன்று கூடினர். அந்த இடத்தில் இயற்கைப் பகையுள்ள பிராணிகள்கூட தங்கள் விரோதத்தை மறந்து ஒன்றுகூடி இருக்கும் என்றால் அது மிகையாகாது.

அந்த யாகத்தில் கலந்துகொள்ள சூதமுனிவர் தன் சிடர்களுடன் வந்து சேர்ந்தார். அவரைக்கண்டு ஏனைய முனிவர்களும், அர்க்யம் முதலியவைகளால் உபசரித்து தங்கள் மகிழ்ச்சியைத் தெரிவித்துக் கொண்டனர்.

அகஸ்தியரைத் தலைவராகக் கொண்டு சௌனகர் முதலிய முனிவர்கள் எல்லோரும் ரோமஹர்ஷணரின் குமாரர் (ஸூத முனிவர்) வியாச முனிவரிடமிருந்து இதிஹாஸ புராணங்கள் அனைத்தும் நன்கு கற்றவர்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

என்பதால் ஓர் தெவிட்டாத கதையைக் கேட்க வேண்டும் என்ற எண்ணத்தால் பின்வருமாறு வேண்டிக்கொண்டனர். "முனிவரே வெகுநாட்களாக இங்கு வசித்து வரும் நாங்கள் ஒரு யாகம் செய்யவிருக்கிறோம் கன்மாக்களின் நடுவில் பரமேஸ்வரருடைய மங்கல சரித்திரங்களைக் கேட்க ஆவலுள்ளவர்களாக இருக்கிறோம்" என்று கூறினார்

பகவான் பரமசிவனுக்கு காசிநகரம் மிகப்பிரியமான இடம் என்று சொல்லக் கேட்டிருக்கிறோம். அதேபோல் சுவேதாரண்யம் (திருவெண்காடு) பஞ்சநதம் (திருவையாறு) கௌரிமாயூரம் (தற்போதுள்ள மயிலாடுதுறை) அர்ஜுனம் (திருவிடைமருதூர்) சாயாவனம் (ஸ்ரீவாஞ்சியம்) என்ற இந்த ஆறு க்ஷேத்திரங்களும் காசிக்குச் சமமாக பரமசிவனுக்குப் பிரியமானவை என்றும் தங்களால் சொல்லப்பட்டுள்ளன. அதில் மயில் வடிவம் பெற்ற பார்வதி தேவி தவத்தால் சிவபெருமானைத் தம் வயப்படுத்திய தலம் 'மாயூரம்' என்ற நகரம் சிறந்து விளங்குகிறது. வியாசர் அருளால் நீங்கள் எல்லாப் புராணங்களையும் அறிவீர். ஆகவே சிவனுக்குப் பிரியமான ஆறு க்ஷேத்திரங்களில் மூன்றாவது தலத்தைப் (மயிலாடுதுறை) பற்றி விரிவாக ஆராய்வதற்குரிய சந்தேகமும் எங்களுக்கு இருந்து வருகிறது. பார்வதி ஏன் மயிலானாள்? அப்பொழுது சிவன் என்ன செய்துகொண்டு இருந்தார்? மாயூரம் எனும் நகரம் எங்குள்ளது? அந்த நகரத்திற்கு முன்னால் இருந்த பெயர் என்ன? யாவுமறிந்த தாங்கள் எங்களுக்கு இவ்விஷயமாக தெளிவான அறிவு ஏற்படும் விதத்தில் அக் கதையைச் சொல்லுங்கள் என்றனர். பற்பல முனிவர்களின் இனிய வேண்டுகோளைக் கேட்டு, தாம் கேட்டறிந்தவற்றைப் பிறருக்குச் சொல்வதன் மூலம் நன்மை பெற விரும்பிய ஸூத முனிவர், அகத்தியர், விநாயகர், அபயாம்பிகை முதலியோர்களை வணங்கி,'சிவபெருமானின் இனிய கதையை உங்களனைவருக்கும் சொல்லுகிறேன் என்று யாவரும் மனம் மகிழும் வண்ணம் கூறலானார்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

முனிவர்களே ! முன்னொரு சமயம் மிகக் கடுமையாக வீசிய சூறைக் காற்றினால் உலகெங்கிலும் கொழுந்துவிட்டு எரிந்த தீ ஜ்வாலையில் மரம், செடி, கொடிகள் யாவும் பற்றி எரிந்தன. அச்சமயம் கடல்கள் கரை கடந்தன. தேவகங்கைக்கும் கடல்களுக்கும் பெரும் சண்டை மூண்டது போல் எங்கும் நீர்மயம். சூரியன் முதலான கிரஹங்கள் யாவுமே அஸ்தமனம் அடைந்தன. உலகெங்கும் காரிருள் சூழ்ந்தது.

இந்நிலையில் சிவபெருமானின் கருணையால் கோடி சூரிய பிரகாசமானதொரு அண்டம் தோன்ற அதிலிருந்து ஹிரண்யகர்பர் (பிரம்மா) முதலில் தோன்றினார். தன்னைத் தவிர வேறு யாருமே இல்லாத உலகைக் கண்டு தாம் யார் ? தாம் தோன்றக் காரணம் யாது ? என்று கண்டறியத் தவம் மேற்கொண்டார். வெகு காலம் தவம் செய்த அவருக்கு முன்பாக பரமசிவன் தோன்றினார். ஊமத்தை மாலை அணிந்த இந்த சிவனே ஒரு சமயம் மிருகண்டு முனிவரின் குமாரனான மார்க்கண்டேயனைக் காப்பாற்றுவதற்காக யமனை இடது காலால் தூக்கி எறிந்தார். பாற்கடல் கடையப்பட்டபொழுது மந்தர மலையை விஷ்ணு ஆமை வடிவம் எடுத்துத் தம் முதுகில் தாங்க, பின்னர் பிரளய காலத் தீயென எழுந்த கொடிய ஹாலாஹல விஷத்தால் உலகம் தீப்பற்றி யெரிந்த சமயம் அவ்விஷத்தை அருந்தியும் உலகைக் காப்பாற்றினார்.

ஒரு சமயம் பகவான் பரமசிவன் எதும் செய்யாது சாக்ஷிபூதமாக இருந்தபொழுது அசுரர்கள் பிரும்மாவைக் குறித்து தவம் புரிந்து மூவுலகத்தையும் ஆக்ரமித்துக் கொண்டு தேவர்களைத் துன்புறுத்தினர். த்ரிபுரம் முப்புரம் என்ற வானில் செல்லும் நகர வடிவம் தாங்கிய அசுரர்களும் அதில் அடங்குவர். அந்த அசுரர்களால் தாக்கப்பட்டுத் துயருற்ற தேவர்கள் இந்திரனிடம் முறையிட இந்திரன் லோகபாலகர்களுடனும் எனைய தேவர்களுடனும் உச்சரவஸ் எனும் குதிரை மீதேறி யுத்தத்திற்குக்

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

கிளம்பினான். கரையைக் கடக்கும் கடல் அலை போல் க்டும் வேகத்துடன் புறப்பட்ட தேவசேனையால் பகைவர் களைப் பயப்படச் செய்துகொண்டு, பேரொலியெழுப்பும் வஜ்ராயுதத்தினைக் கையிலேந்திக்கொண்டு நாற்புறமும் தம் ஆயிரம் கண்களையும் செலுத்தி சூரியன் 'காய்ந்த வைக்கோல் புல்லை' எரிப்பது போல் அசுரர் படையை அழித்தான். அசுரர்கள் தேவசேனையைக் கண்டு பயப்பட வில்லை இரு தரப்பினரும் ஆயுதங்கள், அஸ்திரங்களைக் கொண்டு மிகக் கடுமையாகப் போரிட்டனர். அசுரர்கள் வஜ்ராயுதத்தையும் பொருட்படுத்தாமல் சண்டையிட, ஆயுதங்கள் வீணாயின. முப்புரம் என்ற அசுரர்கள் கடும் போரிட்டுத் தேவர் படையை விரட்டியடித்தனர். தேவ லோகம் அசுரர் வசமானது பிறகு இந்திரனின் விதிப் பயனை வாயார நிந்தித்த வண்ணம் இந்திராதி தேவர்கள் தாமரைப் பீடத்தில் அமர்ந்துள்ள ப்ரும்ம தேவனிடம் முறையிடச் சென்றனர். பிரும்ம தேவரைக் கண்டு வேத வாக்யங்களால் துதித்தனர்.

அவர்களைப் பார்த்து கருணையுடன் நடலிக் கொடுத்து வந்த காரணத்தை வினவினார். தேவர்களும் அசுரர்களுடைய அட்டகாசத்தை விவரித்தனர். பிருஹஸ்பதி அவர்களுக்கு உதவியாகப் பல விஷயங்களை விளக்கமாகக் கூறினார். முப்புரர்கள் "திரிபுரன் என்ற அசுரர்கள் தங்களிடமிருந்து பல வரங்களைப் பெற்று, மதங்கொண்ட வர்களாய் தேவலோகத்தையே ஆக்ரமித்துக்கொண்டு விட்டனர். இந்திரனின் வஜ்ராயுதம் வீணாகிவிட்டது. வருணன் பாசங்களால் கட்டப்பட்டான். யமன் தோல்வி அடைந்தான். ஒவ்வொருவராக அவமானம் அடைந்தனர். சுருங்கக் கூறினால் எல்லாத் தேவர்களுமே அவர்களுக்குப் பணிந்து விட்டனர். நீங்கள்தான் எங்களைக் காப்பாற்ற வேண்டுமென்று" வேண்டினர்.

हिरण्यगर्भो भगवान्यतः प्रादुर्बभूव सः ॥ -२६

स्वस्वमूलं समन्विच्छन्नपश्यन्नात्मनो विना ।
अन्यत् किञ्चित्तपस्तप्तुं ततः समुपचक्रमे ॥ -२७

चिरं तपस्यतस्तस्य ध्यायतः स्वस्वकारणम् ।
निरस्तातिशयः शम्भुः पुरस्तादुदभूद्विधेः ॥ -२८

निर्धूय वामपादेन धुत्तूरकृतभूषणः ।
मार्ताण्डतनयाद्यः प्राक् मार्कण्डेयमपालयत् ॥ -२९

क्षीराब्धौ मथ्यमाने क्षितधरपतिना मन्दरेणामरेन्द्रैः
दैतेयैरप्यभीक्ष्णं दधति पुनरधः कौर्ममास्थाय रूपम् ।
विष्णावुष्णांशुकोटिप्रलयहुतवहज्वालतुल्यं विषाग्निं
दग्धारं यो जगत्यां गलभुवि कलयन्रक्षति स त्रिलोकीम् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अपि च –

कदाचिदुदासीने लीलया यस्मिन् भगवति परमेशाने ॥

कतिचन दनुजास्तनस्त्रिलोक-
प्रभुमभिपूज्य चतुर्मुखं तपोभिः ।
अमरपतिपुरं प्रपद्य चापु-
र्गगनतले गतिमत्पुरत्रयश्च ॥ -३१

ततः समुद्धतैर्दैत्यैरत्याद्दित्यैरहर्दिवम् ।
त्रिदशा दुर्दशां प्राप्ताः प्रापुस्त्रिदिवनायकम् ॥ -३२

ततस्तद्वृत्तान्तमाकर्ण्य वृत्रामित्रः सुत्रामा सत्रा लोकपालैः अत्रासमेव "कुत्रारय" इत्युच्चैरुद्घोषयन् उच्चैःश्रवसमारुह्य ससंभ्रममभ्रमु-वल्लभेन ऐरावतेन समलङ्कृतः, समुल्लङ्घितवेलेन देवसेनासागरेण वित्रासयन्, शत्रुसेनां संह्रादिन्या ह्रादिन्या स्वहस्तविन्यस्तया दिक्षु व्यापारयन्नक्षिसहस्रं चित्रभानुरिव कक्षं विक्षोभयामास समन्ततः समरगताममरारिवाहिनीम् ॥

ततस्तृणीकृतवृन्दारकवृन्दैर्मन्दारतरुप्रसूनकल्पैः कल्पान्तकालबलाहकाटोपैरनल्पप्रकोपैः, प्रज्वलद्भिरिव प्रलयानलैः, त्रिभिरप्यसुरेन्द्रैरङ्गीकृतशस्त्रास्त्रैरनङ्गीकृतारातिकदम्बैः दम्भोलिप्रहारानपि कुम्भोदकप्रायानारचयद्भिः विशस्तेषु समस्तेषु देवराजप्रमुखेषु बर्हिर्मुखेषु वित्रासितायां च सत्राशन-सेनायामीश्वरमानिभिः अनीश्वरैस्तैरेव समाक्रान्ते सङ्क्रन्दनसाम्राज्ये ॥

CC-0 Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विनिष्क्रान्तस्ततः कर्मविधेरद्भुतकर्मणः ।
विधेर्निवासमासेदुः आखण्डलमुखास्सुराः ॥ -३३

तत्र ।

सुखासीनं पद्मे द्रुहिणमुपशान्तं मुनिजन-
रुपास्यं वाग्देव्या वदनकमलान्तस्सदनया ।
कृतालापं रामप्रभृतिभिरनेकैर्नृपतिभिः
समेत्यैने नेमुः सपदि समुदीर्य स्तुतिगिरः ॥ -३४

अवादिषुश्च ।

वाणी तवेयं वदनारविन्दे
नित्यं नरीनर्ति यदि स्तुमस्त्वाम् ॥
रवे रुचा ध्वस्तसमस्तलोक-
ध्वान्तस्य दीपाङ्कुरदा भवामः ॥ -३५

अपि च ॥

त्वय्येकस्मिन् सत्यलोकान्तरस्थे
सर्वे लोकाः सौख्यमेवाप्नुवन्ति ।
तत्तादृक्षं सर्वलोकाधिनाथं
दीनाः स्तोतुं किं नु शक्ता वयं त्वाम् ॥ -३६

ततः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शतमन्युमुखान् मखाशनांस्तान्
पतितान् वीक्ष्य पदाम्बुजे स्वकीये ।
दयया दरहाससुन्दरास्यः
परिपस्पर्श विधिः पवित्रपाणिः ॥ -३७

अवनतमुखबिम्बानायुधापेतहस्तान्
अकरुणविधियोगादार्तशब्दप्रयोगान् ।
समनुनयवचोभिः सान्त्वयित्वाऽऽदितेयान्
सकरुणमयमेनानन्ववादीद्विधाता ॥ -३८

किमिदमिह भवन्तः स्रस्तमूर्धावतंसाः
विगलितमुखवर्णा वीतवीरत्वदर्पाः ।
वदत शमित दुःखाः किं नु युष्माकमासीत्
मयि सति बत योगक्षेमकृत्ये विचारः ॥ -३९

ततस्तदमृतास्वादमाकर्ण्य वचनं विधेः ।
वक्तुमारेभिरे देवाः पूर्वदेवविचेष्टितम् ॥ -४०

ततः सर्वे सुपर्वाणः सर्वदेवपुरोहितम् ।
वाक्पतिं चोदयामासुः स्वानुभूतकथा विधौ ॥ -४१

अभिप्रायं स शक्रस्य ज्ञात्वा ज्ञानवतां वरः ।
सहस्रनयनीदृष्ट्या विधातारमवोचत ॥ -४२

देव तत्रभवताप्यौपनिषदर्थविचारानन्दसमुद्रान्तरावमग्नहृदयेन सर्वथाऽव्यापृत एव त्रिलोकीव्यापारः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तथा हि ।

यथा पुरा काञ्चनरूप्यकायां
मायां समाश्रित्य मनोतिवेगाम् ।
दैत्यास्त्रयः त्वद्वरमानदर्पात्
सुपर्वसाम्राज्यपदेऽभिषिक्ताः ॥ -४३

अपि च ।

नन्दनोपवनं तेषामाक्रीडस्थानमन्वभूत् ।
देवी भगवतीन्द्राणी देहन्यासकृतक्षणा ॥ -४४

सङ्गरे समुपक्रान्ते तैः साकममरारिभिः ।
व्यर्थे वज्रप्रहरणे बलारातिः पलायत ॥ -४५

अपि च ।

पाशी वशीकृतस्तेषां आशीविषमयैश्शरैः ।
आबद्धो बद्धमात्मानं नावेदोद्वेदनातुरः ॥ -४६

वैवस्वतः स्वतो हीनबलो बलवतां वरैः ।
दैत्यदैवाद्विनिर्मुक्तोऽसौमुक्तश्चांन्ययमादयम् ॥ -४७

लज्जावहैस्स्तवैश्चान्यैरन्याय्यवचनैरलम् ।
प्रशंसन्ति हि सन्तो यदपमानस्य गोपनम् ॥ -४८

अतस्त्वमेव शरणमेतेषां विश्वेषां च किं बहुना ।

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्रैकस्य सुरेन्द्रस्य त्रिभिस्त्रैलोक्यरक्षणम् ।
कांक्षितम् सहितोऽस्माभिर्देवमन्तिकेऽस्तु ते ॥ -४९

अन्यथा वयमरण्यानीशरणा एव ।

आकर्ण्य वाणीं सरसां स वाणीं
गरीयसीं गीष्पतिना प्रणीताम् ।
प्रापद्यत स्थानकमेव देवै-
र्देवस्य मृत्योरपि तस्य मृत्योः ॥ -५०

अपि च ।

विप्राः प्राक् संप्रेरिताः क्रूरकृत्या
नानारूपा दारुकाकाननान्ते ।
हत्वा काञ्चिद्यो गृहीत्वा कराभ्यां
मन्यामन्यामङ्घ्रिणा चाममर्द ॥ -५१

सभायस्यासीनैः सभयमपयातान्यजभयैः
अकिञ्चित्सञ्जल्पैरखिलपतिवक्त्राम्बुजमुखैः ।
विनृत्यन्त्या नित्यं विविधसुरयोषित्परिषदा
विशिष्टां प्राप्याज्ञां विधिरुपययौ तां सह सुरैः ॥

तदन्तिकं प्राप्य विधेर्मुखानां-
चतुष्टयी शीघ्रमधोमुखासीत् ।
विचिन्तयन्तीव पुरा नखाग्रैः
व्याकृत्तमूर्ध्नः प्रथितामवस्थाम् ॥ -५३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ततः संप्रणतेषु सङ्क्रन्दनप्रमुखेषु सर्वेषु सुपर्वसार्वभौमेषु ॥

अवतंसिततारेशकलाम्रेडितरोचिषाम् ।
अन्वगृह्णात् कटाक्षाणां वेदङ्ग्येन विधिं विभुः ॥ -५४

अथ वेधा विधेयानां वैदिकानां गिरां गणैः ।
नमकादिभिरीशानां नमश्चक्रे पुनः पुनः ॥ -५५

नमस्यतः प्रेक्ष्य सदस्यनेकान्
वेपैः समावेदितवेदनांस्तान् ।
आहूय लोकेश्वरमानिनोऽयं-
ईशो बभापे बहुमानपूर्वम् ॥ -५६

अहो जगद्धातरि जाग्रति त्वयि ।
प्रभौ जगद्रक्षितरीन्दिरापतौ ।
सहस्रनेत्रे त्रिदिवस्य नेतरि
प्रसादभङ्गः किमबोभवीत्तराम् ॥ -५७

वयं विनिक्षिप्य धुरं भवत्सुतां
जगत्रयीसर्जनरक्षणात्मिकाम् ।
विनोदयन्तो दिवसान्यदृच्छया
कथाविनोदेन सुखं समास्महे ॥ -५८

आः कथमेतादृशी दुर्दशा त्रिदशानामखिलानामप्यापन्निवर्तके सकल-
जगत्प्रवर्त्तके मयि च वर्त्तमाने निःसमाने ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यतो भयमभूद्भूयस्तद्भूत जगदीश्वराः ।
अपनेष्याम्यहं शीघ्रमन्धन्तम इवांशुमान् ॥ -५९

इत्याकर्ण्य महेशस्य गम्भीरांगिरमब्जभूः ।
आबभाषेभयान्नम्रशिरो विनिहिताञ्जलिः ॥ -६०

देवैवमेवैतत् । अथापि किञ्चिदस्ति विज्ञापनीयम् । यदहमाज्ञप्तोऽस्मि तत्रभवता भवता सकलजगत्सर्गक्रियायाः क्रियावतामपि जनानां तत्तदुचितबलप्रदाने च ।

तपस्तप्तं घोरं त्रिभुवनजनक्षोभकरणं
पुरा दैत्येन्द्रैस्तैर्यदि च न दिशामीप्सितमहम् ।
अकाले कल्पः स्यादिति किल भिया यद्वृतमभू-
त्तदेतद्वृतं तत्परिणतमभूदित्थमधुना ॥ -६१

किं बहुना ।

न विष्णुना नैव मया न जिष्णुना
मृधे विपक्ता विबुधारिमण्डली ।
विपह्यते तत्पशवो वयं विभो
पतिः पशूनां विजयेत तां भवान् ॥ -६२

इति शरणं प्रपन्नेषु सर्वेषु गीर्वाणेषु ॥

ततः –

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

बाणो विष्णुर्गिरीद्रो धनुरपि फणिराड्ज्यामम स्यन्दनेभूः
वेदाश्च स्युस्तुरङ्गा पवनहुतवहौ [1]वाजपुङ्खान्तरस्थौ ।
वेधा यन्ताऽर्कचन्द्राव रथयुगपथ तद्वाहदक्षोऽस्मिदेवे
नेत्युक्तेऽस्तत्युदीर्य त्रिदशपतिपु यद्भावितेषूज्जहास ॥

इदं किल चित्रम् ।

हसितेऽभ्युदिते हरस्य दग्धं
पतितं सासुरमेव पूस्त्रयंतत् ।
मिषतामसुरारिनायकाना-
म्मुदितायां तटिनीव वज्रपातः ॥ -६४

इत्थं लोकेश्वरं मान्यानवमत्य सुधाशनान्
दग्ध्वा पुरत्रयं देवो योऽरक्षज्जगतां त्रयम् । -६५

तत्ताद्दग्विभवं देवमग्रतः समुपस्थितम्
प्रेक्ष्य संप्रणतो वेधाः स्तोतुं समुपचक्रमे ॥ -६६

कल्पानोकहमूले कल्पितमणिवेदिके कृतावासम् ।
सुन्दरमन्दसुहासं वन्दे कल्याणभूधरेण्वासम् ॥ -६७

आपद्गताना मखिलेश्वराणां-
आपन्निवृत्तौ खलु दीक्षितस्त्वम् ।

---

1. वाज The feather of an arrow.

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अद्याहमार्तोऽम्बुधिमध्यवर्ती
न स्वामिनं वेद्मि न कृत्यजातम् ॥ -६८

इति स्तुतो वस्तुत एव देवः
प्रसन्नचेताः प्रणतार्तिहारी ।
उदीरयामास गिरं भविष्य-
न्मायूरनामास्ति पुरं व्रजेति ॥ -६९

पुनरभाणी च्च ।

तत्किल निखिलनिगमनिगदितवैभवातिशयं सातिशयगुणगणमहितमहीदेव-कृताधिवासमावासभूतमनेकेषाप्याश्चर्याणां तपश्चर्यातत्परं तत्तज्जनाभिमत-फलप्रदानकृतसङ्कल्पमनल्पविस्तारं कल्पान्ताविनाशि विनाशितविविध-जनसन्तापमापन्नरक्षणधुरन्धरं सह्यधराधरतटादापतन्त्या कवेरकुलय-शस्सम्पादयन्त्या वहन्त्या धन्यायितं वन्याशनैर्वन्यतरशयनैः सन्यासिभि-रतिमान्यैरन्योन्यमाघोषितत्रैदशास्त्रमुखरितहरिदन्तरं मन्दराकारैः सुन्दरै-र्निरन्तरैः पुरन्दरपुरोपमानैरतिमानैर्विमानैरलङ्कृतमण्डपप्राकारमरुन्धती-जानिप्रभृतिभिरनेकैरपि तपस्विसद्धैरपि निर्दग्धसंसारबीजैराक्रान्तचतुरन्तरं अन्तरङ्गभक्तैर्विरक्तैरनुरक्तैरखिलेष्वपि जनेषु जनवादासहिष्णुभिः सहिष्णुभिःशीतोष्णानांभविष्णुभिः परमेश्वरभूयं चोलावनिमण्डलमण्ड-नायितं मामकमेव महितमसमानमास्थानम् ।

गत्वा तत्र तपः समाचार विधे स्थाने मदीये ततः
सिद्धिं प्राप्स्यसि लिङ्गमत्र भविता नाम्ना तवैवाधुना ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स्रष्टुं शक्तिमपि त्रयस्य जगतां तीर्थं त्वदाख्यं भवेत्
स्थानं तत्प्रथितं भविष्यति पुनःब्रह्माटवीत्येव तत् ॥

इत्युक्त्वान्तर्दधे तत्र देवदेवो महेश्वरः
वेधाश्च विविधाह्लादो विधिकाननमाययौ ॥ ७१

तपस्तप्त्वा महत्तत्र महिते ब्रह्मकानने ।
अवाप्य सृष्टिसामर्थ्यं असृजद्विविधाः प्रजाः ॥ -७२

॥ इति मायूरमाहात्म्ये चम्पूकाव्ये प्रथमस्तरङ्गः ॥

॥ हरिः ओम् ॥

॥ द्वितीयस्तरङ्गः ॥

ततः सङ्कल्पमात्रेणैव कल्पितेष्वनल्पतेजोराशिषु सनत्कुमारादिषु कुमारेषु निवृत्तेषु प्रवृत्तेरपरे दक्षप्रभृतयः प्रजापतः सप्तदशापि सप्ततन्तु-प्रधानैः कर्मभिः धर्मेण वर्णाश्रमाणामङ्गीचक्रुरनुष्ठानपथमखिलानामपि-निगमानाम् ॥

तत्र

प्रजापतेस्तु दक्षस्य कन्या दाक्षायणीत्यभूत् ।
आसीन्नामान्तरं तस्यास्सतीत्यपि सतां मतम् ॥ -१

मात्रा पित्रा पूजितां वर्धमानां
कन्यामेनां मन्यमानोऽतिधन्याम् ।

गौरी – 3

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पाणीकृत्य प्रेयसीं प्राप्तरूप-
श्चार्यादीशः स त्रिलोकीगृहस्थः ॥ -२

अथैकोणषष्टिरपि कन्यानामात्मानुरूपानभीकानासाद्य हृद्यानवद्यविद्याविशेषाणि देवतिर्यङ्मनुष्यजातियान्यतिवीर्याण्यनल्पान्यपत्यान्युत्पादयामास ।

अथ तैस्तरुणादित्यप्रकाशननुकान्तिभिः ।
आकीर्णापूर्णविभवं रासीदर्णवमेखला ॥ -३

प्रजापतीनामन्येषां पूजाभिरपि भूरिशः ।
नानाविधाभिधानाभिरावृतं वसुधातलम् ॥ -४

दक्षः प्रजानामधिपः कदाचित्
विक्षोभितान्तःकरणः विधात्रा ।
यष्टुं समैच्छद्यजमानभावं
प्रपद्य सद्यो विधिवद्विधिज्ञः ॥ -५

ततः समाहूय समस्तदेवान्
विष्णुप्रजेशानमुखान्मुनीन्द्रान् ।
भृगुप्रधानान्प्रमथाधिनाथं
विनैव देवं वचनं बभाषे ॥ -६

वेदोक्तमार्गेण विधीन्द्रमुख्यान्
यष्टुं यतिष्ये यदहं सुरेन्द्रान् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ममास्ति वक्तव्यमिहाऽद्य किञ्च-
चछ्रुत्वा विनिश्चित्य वदन्तु सर्वे ॥ -७

अस्ति किल प्रशस्तमतिः सती नाम ममैका कन्या ।

दत्ता मया सादरमेव तस्मै
प्रेतैः पिशाचैः सह वर्तते यः ।
सदा सदारो रमते स एषः
श्मशानदेशे स्मयमानपूर्णः ॥ -८

द्रष्टुं सुतां तां दयितानियोगा-
दयासिषं वेश्म कदाचिदस्य ।
अज्ञानयोगेन तदावलोके
प्रेतान् पिशाचानभिनृत्यतोऽस्मिन् ॥ -९

सोऽपि जामाता तु अपि च

करे शूलं करालं च कण्ठे हालाहलं विषम् ।
कपालकलितां मालां धत्ते वस्ते न वाससी ॥ -१०

अनुलेपायो तस्य चिताभस्मैव केवलम् ।
अवलेपः कियानस्य स नोपन्यसितुं क्षमः ॥ -११

न जानात्येव जनकं नैव जानाति मातरम् ।
न गोत्रं न कुलं वेत्रहस्तोऽपि पुरतोऽस्य कः ॥ -१२

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यज्ञोपवीती नागेन्द्रज्ञोऽयमिति भीषणः ।
स नृत्यते पुरः पत्न्या विस्मिता सा ममात्मजा ॥ -१३

किं बहुना ॥

मयि प्रजापतौ सर्वप्रजासर्जनदीक्षिते ।
प्राप्ते प्रणामं नाकार्षीन्नोत्तस्थौ स्तब्ध एव सः ॥ १४

इत्येतादृशगुणगणमहिततरं जामातरं वीक्ष्य समुपेक्ष्य च तनयामपगतनय-नायकाधीनामुदासीन एव शुनासीरराजधानीविशिष्टवैभवमागत एवास्मि मामकीनं भवनम् ।

अज्ञानिना मया मल्लीमालेव तनया सती ।
अपास्तोन्मत्तहस्ते यत्तेन मे दह्यते मनः ॥ -१५

दैवाद्देवमागतम् ।

सर्वज्ञानामप्यस्माकमस्मिन् विषये महान् मतिभंगः । ततः प्रत्युत्पन्न-मतिना मयैवं निश्चितम् ।

परित्यजामि तां कन्यां धन्यामप्यवरङ्गताम् ।
पूर्णामिह हविष्पात्रे केशस्पृष्टामिवाध्वरे ॥ -१६

किञ्च ।

यष्टास्मि यज्ञेन विलाहमद्य
रुद्राय तस्मै न हविः प्रदास्ये ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दत्वाऽल्पां स्पर्शनमात्र वेदः

तस्मात्पशुभ्यः किं हविषः प्रदानम् ॥ -१७

तथाहि ।

"प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति न्यायेन हविर्दानं हस्त-प्रक्षालनं च न सम्मनुते मे मनः, न चाप्यत्र विचारो बलवद्विरोध-इति ॥

स किं करिष्यतीत्युन्मत्तः समवेता वयं यदि ।

तिरस्कृतः सुरैः सर्वैर्नमस्कृत्य व्रजेद्दिशः ॥ -१८

किञ्च ।

अज्ञानिनो यूयमवश्यमास्थ*

विज्ञानहीनस्य यदस्य सेवाम् ।

सदा तनुध्वे सदसद्विचारे

निरस्तचित्तस्य समस्तकृत्ये ॥ -१९

तद्यूयमेव विचारयध्वं अविचारयितृत्वमस्य देवंमन्यस्य ।

यदयं वेधसः पूर्वमदयं नखरैः खरैः ।

निरकृन्त शिरः शीघ्रं निरपत्रपकर्मकृत् ॥ -२२

यो वाऽमंस्त पुरा युष्मान् पुराखां विनिपातने ।

यः पशूनवृणोद्दर्पादल्पमेधाः सः किंप्रभुः ॥ -२१

* आङ् पूर्वकादसभुवीती धातोर्लटि मध्यमपुरुषबहुवचनान्तं पदम् ॥

CC-0 Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अपि च ॥

अस्ति किलाऽस्माकं अधिकप्रशस्तिमानापन्नित्रागणे वारणेन्द्ररक्षको लक्ष्मी-
नारायणो देवः । तथाहि --

मधुकैटभनामानौ विधूताखिलविष्टपौ ।
अवधूय तयोरङ्गमेदुरां मेदिनीं व्यधात् ॥ -२२

उद्धार पुरा वेदानामज्ज्योन्मज्ज्य वारिषु ।
दानवापहृतानेताननन्ताननहङ्कृतः ॥ -१३

उज्जहार पुनर्भूत्वा वराहो धरणीमिमाम् ।
पातितामतले घोरे दधार कमठः पुनः ॥ -२४

अपि च ।

पुरा खलु पराजितसुरराजेन त्रिविष्टपमाक्रम्य तिष्ठता वरेण्ययशसा हिरण्य-
कशिपुना रिपुणा लोकानामाकुलीभूते समस्तभौतिकप्रपञ्चे, पञ्चस्वपि
देवानोकहेषु स्वर्लोकात् स्वलोकमानीतेषु, सकलेऽपि विष्टपे अनिष्टभूयिष्ठे
परमेष्ठिप्रमुखैरस्माभिरेव संस्मारिते तच्चरिते तत्क्षणमेव शिक्षणे तस्य
चक्षुषा प्रतीचा निश्चित्य कुतश्चिदपि तद्भयोपायमपश्यन्नङ्गीकृत्य भङ्गीं
नरहरेराकृष्य तमङ्के निवेश्य नखरैरेव विदार्य तदुरोभागं महाभागो
भागधेयममराणां अपालयदखिलं भुवनम् ।

बलिना बलिना भूयो विष्टपेऽनिष्टभागिनि ।
वामनत्वमुपाश्रित्य कामं नः कृतवानयम् ॥ -२५

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

त्रेताभिधाने च युगे युगान्तकालानलाकारभुजप्रतापे ।
जाते दशास्ये जगतां कृतान्ते निकृत्तशीर्षाहुतिलब्धभाग्ये ॥

किं वो विस्मृतमेष एव निकृह्मोपो यदन्तर्गृहे
जातोऽजायत कामिनीमुखचमत्कालोकने चन्द्रमाः ।
मन्दश्चन्दनमारुतो व्यजनतां प्राप्तः स्थिते च य-
न्निक्षिप्ताञ्जलयः शिरस्यवनतं यूयं बभूवाग्रतः ॥ -२७

अपाहार्षत्सर्वाभां वासांस्यप्सरसामपि ।
आजहार वरारोहाः सर्वतो गर्वमाहितः ॥ -२८

बलावलेपेन कलाधिनाथ-
कलाविभूषस्य निवासभूतम् ।
कैलासमद्रिं समकम्पयद्यः
चचाल तस्मात् स कपालमाली ॥ -२९

तत्तादृक्षं सकलजगतामीश्वरंमन्यमेनं
विष्णुर्धृत्वा तदनु भगवान्मानुषं वेषमेषः ।
मित्रं कृत्वा स्वकुलपसुतं वानरेन्द्रं रघूणां
नाथः पाथोधिमपि कलयन् बद्धसेतुं जघान ॥ ३०

कंसेन हिंसिते लोके शिशुपालेन बाधिते ।
ररक्ष हत्वा तौ लोकं नन्दगोपस्य नन्दनः -३१

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तदेतस्मिन्नेव देवे देवराजावरजे जगद्रक्षणजागरुके किमनेनातिमानेन रौद्र-
प्रकृतिना रुद्राभिधानेन देवेन ।

अपि च ।

रक्षिता जगतामेष स्रष्टृत्वे दीक्षिता वयम् ।
आस्तां जगदिदं नित्यं संहर्ता किं नु पूज्यते ॥- ३२

अपेक्षितोऽयं दयया निर्दयोऽयं स्वतो यतः ।
अस्माकमुपकर्तॄणां समये न स्मरिष्यति । -३३

किञ्च ।

मायया मोहयन्विश्वमैन्द्रजालिकवत्स्वयम् ।
हनिष्यत्येव नः सर्वानन्धेन तमसावृतान् ॥

इत्यादिकं च तत्युक्ति कृत्याकृत्याविवेकिनः ।
हरिब्रह्मादयो देवाद्देवास्तामनुमेनिरे ॥ -३५

ततः ।

सङ्केतं समतन्वत स्वयममी चामीकरक्षोणिभृ-
च्चापास्याध्वरनायकस्य हविषो मोषाय नाकौकसः ॥
एकस्तत्र तुतोष यः पुरभिदो पादाहतः प्राक्सुरै-
र्नीतो हास्यपदं स एष कलयन्नेषां च तां दुर्दशाम् ॥

अहो विपरीतबुद्धिप्रदातृत्ववैचित्र्यं देवस्य ।

CC-0T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ऐश्वर्यातिशयेन सर्वजगतां यः कारणं ते सुराः
शर्वं पर्वतकन्यकासहचरमत्यात्रमत्याधिकम् ।
अज्ञात्वाऽस्य कर्म तादृशमर्मा वद्धादराश्च स्वयं
विस्मृत्याद्भुतकर्मणो भगवतः कर्माणि जग्मुर्मुदम् ॥ -३७

ततः

यजमानपदे लिप्तितिलानमदोद्धतः ।
विक्षोभदेन्यजगतां दक्षोऽप्यारभताध्वरम् ॥ -३८

अथ सर्वेष्वपि शर्वविमुखेषु सङ्क्रन्दनप्रभृतिषु वृन्दारकेषु परिचरत्सु
यथोचितसङ्कल्पितसमस्तसम्भारसम्पादनकृतसङ्कल्पेषु कल्पानोकहनिवहेष्व-
नल्पप्रभावेषु जाग्रत्सु सर्गे परःशत परार्धसङ्ख्येषु ब्राह्मणेषु । कार्मेषु
कुर्वाणेषु कर्माणि सदस्येषु नमस्येषु वयस्येष्विव काश्यपप्रभृतिषु
शश्वत्सु प्रजापतिषु ततः प्रवर्तमाने सत्रे निरूप्यमाने-

आवाहने हविर्भागकृतो मुनिगणैः कृते ।
हविर्भुग्रसज्ञस्तैरनरै प्रेमरायितम् ॥ -३९

अथागतेषु सर्वेषु गीर्वाणेषु ।

दधीचिनामा दयया मुनीन्द्रो
दक्षं समीक्ष्याऽथ वचो बभाषे
द्रोहो महेशे दुरदृष्टतस्ते
श्रेयस्करः किं भविता दुरन्तः ॥ -४०

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दक्ष स्त्वमद्य दुर्मन्त्रे दक्षत्वमद्यत्वमसे ।
भोक्ताऽसि तत्फलं शीघ्र मोक्ता नैव महेश्वरः ॥ -४१

न विष्णुमाश्रित्य भविष्णुमत्र
क्षणेन विष्टम्भमवीर्यजातम् ।
कुरुष्व कृत्यानि स कृत्तिवासाः
विकर्तयिष्यत्यधुना शिरस्ते ॥ -४२

अपि च

प्रोक्तंपुनः प्रोज्झितभीतिना य-
द्वाक्यं त्वया भाग्यबहिष्कृतेन ।
हुत्वा हविस्तस्य पिनाकपाणेः
पाणेरपि क्षालनमाह वेदः ॥ इति ॥ -४३

तदेतदपि वेदार्थानभिज्ञेन त्वया न सम्यग्विचारितम् (मनाग्विचारितम्)

तथा हि ।

लेपं[1] हुतस्यात्मन इन्दुमौलिः
आज्ञापयच्चण्डनिवेदनीयम् ।
अतस्तदन्यः क्षमते न भोक्तुं
इत्येवमर्थं निगमा वदन्ति ॥ -४४

---

1. लेप - Ramnat, a small remaing Part sticking to the hand or wooden ladle made of Palasa or Khadira.

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स कालकालः कलयामृतांशो-
रलङ्कृतोऽलं तव तोलनेऽपि
हिता न ते नाम जना यतो
बलावलेपस्तव लापहेतुः ॥ -४५

न लेखवाला[1] न च लोकपालाः
न वालखिल्या मुनयो न तुल्याः ।
त्वां त्रातुमत्रालमलङ्कृताङ्गे (ङ्गाः)
नैवातपत्र हि भवेत्पवित्रम् ॥ -४६

रक्षिष्यति श्रीपतिरित्यवादी-
द्भवान् किलैतद्भविता मुधैव ।
समक्षमस्यैव वदामि साक्षी
पद्मासनश्छद्मकृतावमानः ॥ -४७

तथा हि ।

पुरा खलु परस्पराहङ्कारमदोन्मत्तयोः अहमीशोऽहमीश इति बद्धस्पर्धातिशययोः बलाहकयोरिव वर्धमानकलहयोः चिरमुपगतभ्रान्तचित्तयोः ईशमायापयातनिजाश्रयज्ञानयोः कमलासनकमलेक्षणयोः अक्षमे युद्धाभिमाने, "कथमनयोरुपशमः" इति विचिन्त्य भगवता पादप्रहारप्राभूतश्राद्धदेवेन देवेन तदन्तरे निरन्तरोदितभानुकोटिप्रकाशेन मूर्धान्तरिताः

---

1. लेखवाला देवशिशवः, अज्ञातशिवप्रतापाः आत्मानं बलिनं मन्यमाना देवाः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

न्तरिक्षेण पादातिक्रान्तपातालभागेन ज्योतिर्मयेन लिङ्गरूपेण प्रादुरभावि ।

आपातालनभोऽन्तरिक्षविलसच्चन्द्रार्कतारादिक-
ज्योतिष्यत्र निजप्रभापरिचितब्रह्माण्डदिङ्मण्डले ।
किन्न्वेतत् कुत एतदित्यविकलं सञ्जल्पतोरेतयो-
रासीदन्तरनेकमोहकलुषीभावो हरिब्रह्मणोः ॥ -४८

वीक्ष्य तद्विस्मितावेतौ वीक्षमाणावितस्ततः ।
अभाणीन्नाभसी वाणी गम्भीरमधुराक्षरम् ॥ -४९

युवामवान्तरैश्वर्यमदाज्ञातनिजाश्रयौ ।
युध्येथे रहितौ बुध्या कृत्याकृत्यविनिश्चयम् ॥ -५०

आस्तां तदाविर्भूतस्य स्थाणोः अणोरणीयसो महतोऽपि महीयसः, समस्तौ व्यस्तौ वा समधिगम्य शिरस्तदं सम्पादयेथां सम्यगस्य प्रौढिमानमिति ।

तदाकर्ण्य तादृगोमाकाशवाणीमाविर्भूतसंरम्भातिशयकृतसङ्केतयोरेतयोरेकः पदमितरश्शिर इति द्रष्टुकामयोस्तयोः, हरिरास्थाय वाराहं रूपं आविवेश पातालं अब्जभूरपि नभोमानसौकसम् ।

ततः

आपातालतलान्तमेष भगवानाविश्य पादाम्बुज-
द्वन्द्वं द्रष्टुमनाः पुनस्तत इतोऽतिक्रम्य कालं बहुम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नैवाऽलोकत तान्तकान्ततनुकः श्रान्त्या ततो वेधसः
कृत्यं व्यत्ययितं विचिन्त्य सहसाऽधस्तादुदस्थाद्विभुः ॥

स दृष्ट्वा तं विष्णुं सपदि समुदासीच्छतधृतिः
स साक्षीपुष्पेण प्रथितयशसा कैतकमिति ।
मया दृष्टं शीर्षं तव वदतु तन्मूर्धनिलयं
दलं केतक्यास्तद्विदितमिदमस्त्वित्यपि जगौ ॥ -५२

इति वादिनि धातरि[1] प्रसूने
वचनं सत्यमिति ब्रुवत्यमुष्य ।
उदतिष्ठदनेकभानुकोटि-
प्रतिमस्तत्र स पार्वतीवयस्यः ॥ -५३

ततः

विलज्जमानेषु विधेर्मुखेषु
सर्वंसहामेव समाप्नुवत्सु ।
स कैतवे कैतकनाम्नि पुष्पे
चुकोप चामीकरगोत्रचापः ॥ -५४

अभाणीच्च ।

[2]विधे मुधाभाषणतस्तवार्चा
नैव प्रतिष्ठाऽपि भवेो धरित्र्याम् ।

---

1. केतकीकुसुमस्वरूपे धातरि इत्यर्थः ।
2. हे विधे मृषाभाषणफलत्वेन तव भूलोके न पूजा नापि प्रतिष्ठा भविष्यति इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सकैतवं कैतकपुष्पमेत-

दितः परं नार्हति मत्किरीटम् ॥ -५५

ततः

आशेषस्थानमासाद्य मार्गमाणः पदं हरिः ।

श्रमात्रावशेषोऽहमागतोऽस्मीत्यवोचत ॥ -५६

इति वादिनि भगवति वासुदेवे ।

कथाभिरनुरूपाभिराश्वास्य परमेश्वरः ।

यथार्थवादिनं देवं नारायणममोदत ॥ -५७

मुहुर्मुहुर्विधेरर्थे प्रार्थ्यमानो मुरद्विषा ।

कथञ्चिदनुजज्ञे तं विचरेति यथापुरम् ॥ -५८

किं बहुना ।

पिनाकपाणिमेवैनं शार्ङ्गपाणिं विचारय ।

नैतयोरन्तरं तद्वद्भवान् वीक्षिष्यते शनैः ॥ -५९

इत्युदीरितममुष्य वचस्त-

त्सत्यमेतदवगत्य सुरेन्द्राः ।

अत्यपायमनयं कलयन्तः

तत्यजुर्न मुनिनिश्चितमर्थम् ॥ -६०

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्र केचन विवेकविहीना:
विष्णुमेव परमं कलयन्तः ।
भाषणानि विविधानि दधीचे-
र्दूषणास्पदपदानि च चक्रुः ॥ -६१

अथ तेन कोपावेशवशीकृतान्तःकरणेन दधीचिना मुनिना केचन जना जनार्दनपक्षपातिनो भेदवादिनः पशुपतिप्रसादविनाकृता यूयं पराकृतवैदिकधर्मा निर्मर्यादा दामोदरदयाविनाभूता भूतापाये यातना बह्वीरप्यनुभूय भूयो वेतालादिषु पिशाचयोनिषु जायध्वमिति यथापराधं शेपिरे ॥

तथा हि ।

वेदार्थानां विचारेण सभ्यत्वं समुपेयुषाम् ।
द्विजानामपलापश्चेद्द्विजा एव न ते किमु ॥ -६२

मायन्ति वा प्रकृति कारणतापदे ये
तिष्ठन्ति विष्णुविधिशक्रमुखाः सुरेन्द्राः ।
वेदार्थनिश्चयविधौ विनियुज्यमानाः
मुह्यन्ति हन्त मुनयोऽभिनवाः सुराणाम् ॥ -६३

भक्तिं कुर्वन्तु सर्वत्र देवमात्रे विपश्चितः ।
देवहेलनमेवैतत्पापं वेदगिरो विदुः ॥ -६४

अन्ये तत्र मन्यमाना महान्तं कलहं भाविनं अकुलान्तःकरणा प्रजापतिमपि दक्षमदक्षमेव विचार्य कार्याकार्यविचारविदोऽस्यापारं मन्युमापादयन्तः सत्रासमेव सत्रायतनादपससृपुरेव ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अथ दैवादाकर्णितसकलजनकपत्रवृत्ता दुर्दान्ततामस्य मनस्यनुसन्दधाना सती चिरमन्तश्चिन्तयामास ।

तथा हि ।

मोहो महानस्य महानुभावं
देवं महान्तं महसाऽवमत्य ।
यतिष्यते यज्ञविधौ पतिष्य-
त्यवश्यमन्धे तमसि क्षणेन ॥ -६५

किमत्र कृत्यं खलु कृत्तिवासाः
कृतान्तदेहस्य च यः कृतान्तः ।
सहिष्यते नैव सदस्यमुष्मिन्
वैमानिकानां पुरतोऽवमानम् ॥ -६६

यस्य वीक्षाविशेषेण सर्वमेतच्चराचरम् ।
विनाशमेति वृद्धिश्च स कथं तत्क्षमिष्यते ॥ -६७

कथमियं मया निस्तरणीया स्यादतमितबुद्धेर्दक्षहतकस्य जठरजातया मह-त्यापत् । यदि मे वदिष्यन्त्यविदितवृत्तान्तास्सर्वलोकाः ।

तथा हि-

"दाक्षायणीति विदिता जगतामधीश-
प्रेयस्यहो स्वपितुरेव विनाशहेतुः ।

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

जातेति जन्म [1]मम नामपुरस्सरात्किं
अस्मादभूदघवतां प्रथमात् प्रजेशात् ॥ -६८

इत्याग्रजंगतामाद्या विचारैर्विविधैरपि ।
विनिश्चिकाय कर्तव्यं विनिश्चस्य मुहुर्मुहुः ॥ -६९

अनाहूता पित्रा कथमहमुपेयां क्रतुभुवं
कथं वा तादक्षं मुखमपि विलोकेय विमुखम् ।
अनाहूता यज्ञं व्रजतु जननेत्यस्ति किल च-
द्विधानं वैयर्थ्यं भजतु किमतो गन्तुमुचितम् ॥ -७०

अपि च ।

नियमातिक्रमो यत्स्यात्पित्रोरपि गुरोरपि ।
योधनं रहसि प्रायः श्रेयस्करमुदाहृतम् ॥ -७१

समाधास्ये तथा तातं स्वयं गत्वा [2]सवस्थितम् ।
न द्रुह्यति यथा विश्वनाथाय निधये सताम् ॥ -७२

इति निश्चित्य भवतु कथमात्मपितृद्रोहे भगवते देवायेति विचिन्त्य विगतयथोचितमुखवर्णायामपर्णायाम् —

अथ देवो महादेव्या मनस्येव कृतालयः ।
अभिप्रायं समज्ञासीद्यज्ञालोकक्रतोत्सवम् ॥ -७३

---

1. मम नामपुरःसरात् दाक्षायणीति मन्नाम प्रवर्तकात् अस्मात् (दक्ष) प्रजापतेः मम जन्म किमभूत् इति भावः ॥

2. सव — यज्ञ

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

न त्वयं तनूद्भवां वाऽतनुमानपूरितः ॥

जिगमिषति मनस्ते देवि तस्याध्वरं तं
पितुरधिकतम श्रीधीक्षणौत्सुक्यभाजः ।
तदिदमहमयुक्तं चिन्तयाम्येव यत्त्व-
य्यवगतिरतुलां नो वर्धयिष्यत्यवज्ञाम् ॥ -७४

अपि च ।

स खलु खलजनानामग्रणीरग्रजन्मा
हविरपि च मदीयं दास्यो नैव मह्यम् ।
भवतु भजतु कीर्तिं तादृशीं स प्रजाना-
मधिपतिरहमेतत्तत्कृते मर्षयामि ॥ -७५

इति निगदति देवे वाक्यमौदार्ययुक्तं
भुवनविदितकीर्तौ भूधरेऽध्यासनेऽस्मिन् ।
पदयुगपतिता सा सत्यवश्यं वरेण्यं
वरमवृणुत यायां वारिताप्यध्वरं तम् ॥ -७६

अवलोक्य ततः सिताङ्कुरैर्धवलीकृत्य दिशो दश स्वयम् ।
दयितां दरहाससुन्दरं वच ऊचे मदनान्तकृद्विभुः ॥ -७७

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पिता तवाऽयं जगतां पितामहो
दक्षः प्रजेशः स मखेन यक्ष्यते ।
जामातरं मां न जुहाव गर्वतः
हेतुं त्रयाणां जगतां अधीश्वरम् ॥ -७८

यदि गच्छसि देवि सत्वनन्तुं
यदि वा तेन कृतस्तवावमानः ।
न सहे तमहं ततो विधास्ये
पुरतस्ते पुरुषाधमस्य दण्डम् ॥ -७९

इति वादिनि यामिनीशचूडे
कमितर्यप्यवमत्य तस्य वाक्यम् ।
अबलाजनभूषणं यदेतत्-
सहसा साऽसमभिकाऽऽलम्बे ॥ -८०

अथ निष्क्रान्तायां कान्तायां स्वजनप्रेमाकृष्टस्वान्तायाम् ।

अनुयानाय स गणान् गणनाथानथादिशत् ।
गत्वा सहैव तत्रत्यो वृत्तान्तोऽप्यवगम्यताम् ॥ -८१

इत्यादिष्टा महेशेन सत्या साकं गणेश्वराः ।
निर्जग्मुर्निर्जरैश्वर्यकुलानलशिखा इव ॥ -८२

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रेषयन्नेव दयितां दोषमालोच्य भाविनम् ।
शेषं विचिन्त्य कर्तव्यं दोषमीशोऽन्वपद्यत ॥ -८३

ततस्सती साहसशम्भुकिङ्करैः
अतीत्य मार्गं वृषभेण नन्दिना ।
सखीजनैश्च सर्वैरिशासनं
निधाय चित्ते पितुरन्तिकं ययौ ॥ -८४

॥ इति गौरीमायूरमाहात्म्ये चम्पूप्रबन्धे द्वितीयस्तरङ्गः ॥

॥ हरिः ओम् ॥

॥ तृतीयस्तरङ्गः ॥

स दीक्षितोऽवेक्ष्य सतीं समागतां
रोषातिरेकारुणिताननेक्षणः ।
नैवाऽवभाषे कृतपादवन्दना-
माशिःपदं वा न जगाद सादरम् ॥ -१

ततः ।

विचिन्त्य व्यापृतं तातं त्रेताजनकर्मणि ।
जननीं सर्वजननी विनयेनाऽभ्यवन्दत ॥ -२

एकोनषष्ट्या तनयामणिभिः सा समावृता ।
तां वन्दमानां नावादीन्निद्रावशमिवागता ॥ -३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आश्चर्यनःश्र्यश्चर्यस्य दक्षस्यानिष्टफलहेतुभूतदुष्टबुद्धिजनकत्वं दिष्टस्य । तथा हि ।

यस्यावाप्य कटाक्षवीक्षणकलां कालानलज्वालया
दग्धं विश्वमिदं सुधाभिरिव संसिक्तं पुनर्वर्धते ।
तत्तादृक्षमहिम्नि धाम्नि महसां पादान्तिकाभ्यानते
मःवज्ञ यदवस्थितं न किमिदं तद्दुर्दशासूचकम् ॥ ४

अपि च ।

सोदर्यास्वप्यनेकासु काचिच्च सहजा सतीम् ।
नैवालिलिङ्ग नोवाच नापश्यदपि तन्मुखम् ॥ ५

अपजहसुश्च —

उक्षाणमेनमधिरुह्य गणैस्समेता
भिक्षाटनाय किमियं समयादमूर्नः ।
भिक्षाशनाय तनयां किमदात्स दक्षो-
प्यस्मत्पिता विलिखितं विधिना तथास्याः ॥ ६

अपि च ।

आश्लिष्टा स्यात् कदाचित् भवति किल चिताभस्मना लिप्तगात्री
भर्त्रा नः सोदरी तत्कथमिव सहमास्माभिराश्लेषणीया ।
संभाष्या वा भविष्यद्यदि च पशुपतेरीश्वरत्वं त्रिलोक्याः
भङ्गो वास्माकमैष्यत्तदवधि सुहृदाम्नार्हति प्रौढिमानम् ॥ ७

तथा हि -

वयं गृहिण्यो जगदीश्वराणां
तथा जनन्योऽप्यमरेश्वराणाम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कुटुम्बिनी किं कुलपौरुषाख्यां
हीनस्य मान्या मदनद्विषो नः ॥ -८

गौरवेण न पितुर्न जनन्या
नैव सोदरजनस्य वधूनाम् ।
जायते बहुमतिः पतिभाग्यै-
र्भाग्यवन्तमखिलगनसिद्धम् ॥ -९

इत्यादि बहु दुर्भाषमाणानां भषन्तीनामिव शुनीनां सोदरीपाशानां अनकार्ण्यै-
वचः एव पत्युः बहुमेने ॥

अथ मनसि वचस्तन्मन्मथारेर्भवानी
परिणतफलमेव प्रापयन्ती गणेशान् ।
भवत भगवतस्ते यूयमभ्यर्णदेशे
प्रणतिमपि मदीयां ब्रूत यातेत्यवादीत् ॥ -१०

ततो मन्दायमान ।

मानसव्यापारे सर्वस्मिन्नपि शर्वसेनावृन्दे, विष्टम्भितेषु कष्टमापादितमिति
वसिष्ठादिषु वरिष्ठेषु

सोदरीपाशानां पाश expreses contempt or depreation as in छात्र पाश ahead pupil. Hence of the lead sisters.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हविष्षु हूयमानेषु भुञ्जानेषु च नाकिषु ।
भागेभर्तुरदत्ते मत्यादश्च गिरमम्बिका ॥ -११

न शोभनं तात तवेदमीदृशं
यदद्य दद्या न हविर्हविष्मते ।
पिनाकिने नाकिनमस्कृताङ्घ्रये
विनाशकालात् विधेचादितो दृढम् ॥ -१२

एवं खलु नीतिः

महतोऽवमतिर्मनःकृता वा-
प्यहह स्वस्य तनोति शीघ्रनाशम् ।
सुरसिन्धुरधो हरं निनीषु-
र्विननाशाशु शिरस्यमुष्य सेयम् ॥ -१३

किमिति प्रत्यक्षमेव कृतमन्तुं भवन्तं अनुमन्तुमन्तकारिः क्षमिष्यते ।
अहो श्रूयतां भवद्भिरपि परमापद्गतैरिति सदस्यानभिमुखीकृत्य ।

अहो सदस्या हरिमुख्यदेवताः
मखो महानेष महोऽनुभूयते ।
परंपरीणामदशा सहिष्यते
कथं भवद्भिः प्रभुतामदोद्धतैः ॥ -१४

इति वादिन्यां भवान्यां अनाकर्णितवत्स्वित्र पराङ्मुखेषु चतुर्मुखप्रभृतिषु
बृन्दारकेषु, नारायणेऽपि साधारणे, मौनशरणेषु मुनिगणेषु,

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सर्वेषामपि पश्यतां पुरभिदः सा शक्तिराद्या सती
कोपावेशवशेन वह्निमभजद्यं वीक्ष्य सर्वं जगत् ।
तस्तम्भ प्रववौ च वायुरनलो जज्वाल चोल्काशतै-
रार्कीर्णं गगनान्तरं समभवद्व्याकीर्णतारागणम् ॥ -१५

अथ साऽचिन्तयद्देवी मनसा ख्यातरंहसा ।
त्यक्ष्यामि दक्षादुत्पन्नं शरीरं पापमेधसः ॥ -१६

विचिन्त्य, सत्यमेव खलु वचनं नीतिविदाम् ।

तथा हि —

सुहृदा शुचिबुद्धिनोदितं
वचनं यो न शृणोति मानवः ।
परिभूतिमुपैति भूयसीं
सदृशां निन्द्यदशां प्रपद्यते ॥ इति । -१७

[1]अत्रत्यनुभवामः परमेश्वरमताननुमतिफलम् ।

कृत्वा निश्चयमित्थमद्रितनया देवं महान्तं विभुं
स्मृत्वा वेदमयं पिनाकधनुषं ब्रह्मादिदेवेश्वरम् ।
सर्वेषामपि पश्यतां सुरमुनीन्द्राणां पुरस्तात्पितुः
योगाग्नौ तनुमत्यजत् कृतदया क्रीडामयूरी दृशा ॥

1. चक्षुष्मतां विदुषां मध्ये ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अप्राकृतेन देहेन तत्क्षणं दक्षकन्यका ।
अलश्चकार देवस्य देवी वामकलेवरम् ॥ -१९

ततः तत्क्षणमेव विक्षोभिते दक्षसदसि, परस्परमालोकमाने दुरभिमाने सोदरीकदम्बे, शम्पायामिव सकम्पायां तदम्बायां, ताने ऽपि वानेरितन्तराविव कृतपाने, मौनशरणेषु मुनिगणवारणेषु, कारणेषु च कष्टेषु समापत्सु, किमिदं क्रमनमेत्य गतनयस्तनयैरदित्या विदित्वा च भाविनं अर्थं व्यर्थीकृताशयैः कदर्थीकृतप्रयोजनैः सुमनोभिरव्यमनोभिरखिलैरपि मूकीभूतम् ॥

अन्तर्दधे तदा वेधाः वेपमानशिरश्चयः[1] ।
विज्ञातकोपः प्रथमं प्रमथाधिपतेर्विभोः ॥ -२०

ततः

आश्वास्य तां संसदमिन्दिरायाः
पतिः प्रयासेन भयातिरेकाम् ।
यथापुनर्यज्ञविधिं विधातु-
मुद्योजयामास यथापुरस्तात् ॥ -२१

ततः समाकर्णितसकलसन्ततन्तुवृत्तान्तेन शूलप्रहारशकलीकृतजलन्धरासुरदेहेन देवेन कोपावर्तितभ्रुकुटिना निटिलानललोचनोन्मेषसमुन्मिषितधूमसन्तानव्याकुलीभूतलोकालोकेन वेलातिलङ्घनजङ्घालेन पराक्रम-

---

1. वेपमानः शिरसां चयः यस्येति तथा ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पयोराशिना दक्षशिक्षणमध्वरध्वंसनं सुपर्वगर्वभञ्जनं चाशानेन किञ्चिदाविष्कृते गेषे ।

कोपस्तस्य कररस्फुरत्त्रिशिखसंमूर्छद्ववविर्भु वशाखा-
सस्सकनाखिलविष्टपो विधुकलाविद्योदिताशामुखः ।
किं कर्तव्यमहो मया वद विभो मर्तव्यमाः केन वे-
त्युच्चरूपमुदीरयन्नुदभवत् कश्चित् गणेशाग्रणीः ॥ २२

दत्ताद्दक्षगुणाश्च तत्र समये वेत्रोल्लसत्पाणयो
निस्त्रिंशप्रवरोल्लसत्करतलाश्शस्त्रास्त्रसङ्घोज्वलाः
उत्तस्थुस्तरसा जगत्त्रयमिदं दग्धुं निहन्तुं पुनः
स्रष्टुं रक्षितुं ईश्वरा वयमिति द्रागीरयन्तो गणाः ॥ २३

अथ तान् भगवानाह वीक्ष्य वीरगुणान्गणान् ।
प्रथमं वीरभद्रेति समाहूय महाबलम् ॥ -२४

नाम्ना दक्षः कश्चिदीशः प्रजानां
भूम्ना सृष्टो यो मया सृष्टिहेतोः ।
व्योम्ना गत्वा शीघ्रमस्यान्तिकं त्वं
साम्ना भूयाः साधु मद्वाक्यमेवम् ॥ -२५

यज्ञस्त्वया समारब्धो यो वेदविधिचोदितः ।
अन्यथा कुर्वतस्तत्ते मन्येथास्तादृशं फलम् ॥ -२६

वेदानधीत्य विधिवत्किल वेदवाक्य-
सञ्चोदितैः मखवरैर्महिता यजन्ते ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

जानासि नत्वमिह वेदगरो न चार्थान्
यष्टा कथं भवसि नष्टविवेकजातः ॥ -२७

मुष्टिमुष्टि कचाकचि प्रतिपदं वेदास्तुवन्त्येव ते
मामेवाध्वरनायकं च पशवो मह्यं निबद्धा इति ।
तत्तादृक्षगुणेषु तेषु कतमच्चत्वं वेत्थ वेदैर्दृशा
कृत्यं किं मल न तज्जडाध्ययामासीस्त्वमक्रेसरः ॥ -२८

देवा वा मुनयः प्रजेश्वरगणाः सिद्धाश्च विद्याधरा
नागाः किंपुरुषा दिशां च पतयो ये चेश्वरंमन्यकाः ।
विष्ण्वाद्या यदुपाश्रयादिह भवान्नोऽदत्त मह्यं हविः
तैः सार्धं क्व गमिष्यति क्षणमपि क्रुद्धे मयीशे सति ॥

ब्रह्माणः कति विष्णवः कति पुना रुद्राः कतीन्द्रादयो
दिक्पालाः कति सिद्धसाध्यनिचयाः दैतेयराजाः कति ।
आदित्याः कति मन्मथाः कति यमाः कत्येव नीता क्षयं
कार्यं रचयन्नकार्यमधुना भुवतः क्व यातो भवेः ॥ २९

तिष्ठन्त्वेते वीरवादा मदीयाः
नित्यं यन्नो यागमध्ये हविस्तत् ।
को वाऽगृह्णाद् ब्रूहि नो चेत् प्रदेहि
प्रायो जीवेत्तस्मदन्दस्य किं तत् ॥ -३०

अपि च -

पत्नी मदीया तव सन्निधान-
मभ्येत्य तत्राज तनुं पदेषा ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आनीय तां देहि यथापुरं न-
स्ततो निर्दिष्टस्व यथाभिलापम् ॥ -३१

इत्युक्तमात्रे सति यद्यभीतः
स दुर्वचं वक्तुपथारभेत ।
समारभस्व प्रमथैस्समेतो
दक्षस्य शिक्षाविषये यथागः ॥ -३२

इत्यादिष्टो वीरभद्रो गणेन्द्रै-
र्मृत्योस्तुल्यैस्तोलिताद्रीन्द्रवृन्दैः ।
अध्वानं तं साऽत्यतीत्यैव वेगात्
ऊर्ध्वैर्वाशा यज्ञवाटं विवेश ॥ -३३

आविष्टे वीरभद्रेण सदस्यस्मिन् मुनीह तत् ।
परस्परमुखालोकतिरस्करणविह्वलम् ॥ -३४

अथ वीरभद्रोऽपि भगवतः सन्देशं यथावत्प्रजापतये दक्षाय ससद-
स्यायोपदिश्य -

सम्भाष्य गणेशानः प्रजेशानमभाषत ।
हविर्नः स्वामिनो देयं प्रदेहि प्रमथेशितुः ॥ -३५

अपि च ।

असतस्ते सती पुत्री पत्नी या परमेशितुः ।
अत्याक्षीत्तनुमत्यापत्तामदत्तवतस्तव ॥ -३६

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वर्तन्ते निखिला वेदाः स्पर्धन्ते मुनयोऽधुना ।
विचारय त्वं कर्तव्यं कच्चाकच्चि मृधात्पुग ॥ -३७

इति वादिनि वीरपूर्भिभे
मतिहीनः पतिरेष स प्रजानाम् ।
अतिवादमुवाच वाचमेतां
कृतिनां गर्ह्यतमां सदोगतानाम् ॥ -३८

यदि याज्या निगमे पुरोनुवाक्या
गदितास्ते मुदिताय भूतनृत्तैः ।
प्रमथप्रभवे ततः प्रदास्ये
प्रथमं तद्धविरीप्सितं सुराणाम् ॥ -३९

तिष्ठतु तावदिदम् ।

देव त्वं कथमस्य केवलचिताभस्मानुलेपस्य त
द्वारतां यस्य पुरस्सराः पुरभिदो वेतलवैतालिकाः ।
अस्थीन्याभरणानि च स्थितिरभून्नित्यं श्मशानान्तरे
तस्मै तद्धविरध्वरे कथमहो दातुं मतिर्जृम्भते ॥ -४०

अपि च ।

हस्ताधं हि विधेर्व्यधायि सहसा मृत्यापुनर्भक्षितः
क्ष्वेलक्ष्मेलनमेव भूतनिचयैराच्छादनं चर्मणा ।

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भिक्षाभक्ष्यगगुप्रजाप्य ततरां भीमत्वमस्याधिकं ।
धिक्तं त क्तमभं रुमद्य सकलैरिन्द्रादिवृन्दारकैः ॥ -४१

इत्यतिक्रान्तमर्यादं भाषमाणे प्रजापतौ ।
अजागलस्तनेष्वेव द्विजादपु सुगादिपु ॥ -४२

मन्दस्मितमुखः किञ्चित्मन्दष्टदशनच्छदः ।
मन्दत्वमस्य निश्चित्य मन्दं वीरः पुनर्जगौ ॥ -४३

हे ब्रह्मन् हे सदस्याः श्रुतम इह भवत्सन्निधौ मूर्तिमत्यः
सर्वाः शर्वस्य किं वा श्रुतिषु निगदितः किं नु जानीथ यूयम् ।
मन्त्रास्तस्येश्वरस्य प्रथितनिगरणाः सन्ति किं नो हविर्वे-
स्येतत्ताः पृच्छतेना यदि च न हि विदुर्यातु दूरं पिनाकि ॥ इति

मध्यस्थत्वं भावयन्तस्ततस्ते
पप्रच्छुस्तान्वेद राशीननेकान् ।
वेदा एवं ब्रूत किं वित्त यूयं
रुद्रं देवं भद्रमाशास्महे वः ॥ -४५

ततः ।

चतुष्टय्यपि वेदानामनिष्टमपि चात्मनः ।
मन्वाना वन्यथावादे तन्वाना जगतोऽहितम् ॥ -४६

अवोचत वचो मन्दममन्देतरवादिनी ।
योऽयं सर्वजगत्साक्षी यूयं जानीथ तं न किम् ॥ -४७

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भीता यस्य वयं समस्तजगतामीशस्य शम्भोर्विभोः
साक्षादीक्षितुमक्षमा भगवतः कोपाय कुर्मो नमः ।
तत्तादृक्षविभूतिमीश्वरतमं मत्वा भवन्तो भव
किं नो विस्थ किमद्य वः समभवन्मोहा महानीदृशः ॥

दग्धं पूस्त्रयमस्तमेव गमितो मृत्युः स्मरो भस्मतां
नीतः पीतमनेकलोकदहनोद्युक्तं विषं तादृशम् ।
स्रष्टुश्छिन्नमभूच्छिरस्त्रिजगतीमान्यस्य तस्येशतुः
कृत्वा विप्रियमीदृशं किमधुना श्रेयः प्रजायेत वः ॥ -४९

इत्येतावदुदाहरन्ति निगमाः वाचं मदीयां क्षणात्
प्रोद्यत्कोपकलाविलासविदलद्दिक्चक्रचक्राचलः ।
शूलप्रोतमथातनोत्तनुमथो दक्षस्य विक्षोभितं
त्रैलोक्ये सदसि स्थितानपि विभुर्द्राग्वीरभद्रोऽरुधत् ॥

ततः तत्क्षणमेवाऽऽशुशुक्षणिमङ्गीकृतमृगशरीरं पलायमानं निरभिमानमात्मन-स्तनुमष्टमीं शिक्षणयोग्यमभ्युपेक्षणमाण एव नाशिक्षयत् ।

ततः सङ्क्रन्दने समधिकाक्रन्दने, नारायणेऽपि पलायनपरायणे, पवमानेऽपि कृतावमाने, 'नाहं नाह'मित्यङ्गीकृतसत्ययोर्नासत्ययोः, अत्ययोऽस्माकमित्येव कान्दिशीकेषु, वृन्दारकेषुविगतचेतसि प्रचेतसि, अश्रुतिं गतेषु विश्रुतेषु कन्दर्पकालप्रभृतिषु भार्गवादिषु, च मार्गमाणेषु शरणं मुनिगणेषु, असाध्य-चिकित्सेषु साध्येषु विनष्टवीर्येष्वष्टसुवसुषु पदद्वन्द्वानतेषु, द्वादशादित्येषु भग्नरदनेषु, अगतलोचनायां भगदेवतायां अकालप्रलयभयप्रकम्पित-विरिञ्चे समस्तप्रपञ्चे ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विज्ञा वीरभद्रस्य विचेष्टितमुमापतेः ।
उदयादुदयाद्रेः *उदद्रादिव भास्करः ॥ -५१

आपदुद्धारकत्वेन लब्धनामा जगत्त्रये ।
आपदां तां समुद्धर्तुं आपदर्धेन्दुभूषणः ॥ -५२

आविर्भूतमथेश्वरं सुरसरिच्चन्द्रार्धचूडं गिरि
वामार्धाश्रितभामिनीकमखिलैराराध्यपादाम्बुजम् ।
आरूढाद्रिसमानसारवृषभं चामीकरक्षोणिभृ-
च्चापं देवमवेक्ष्य किञ्चिदिव सप्राणा सभा साऽभवत् ॥

ततः

ततः सभासदः सर्वे शर्वं गर्वविनाकृताः ।
नमस्कैः समुपस्थाय भीतभीता व्यजिज्ञपन् ॥ -५४

कृत्वागस्तव पिनाकिनः पशुपते वान्ताक्षितारा: परे
केचिद्वक्षसि विक्षतास्तास्तदितरे निष्क्रान्तदन्ताः कृताः ।
अन्ये कृत्तगला गणैस्तावद्विभो पर्याप्तमेतावता
सर्वं शर्व सहस्व दक्षमपि नः सर्वान् समुज्जीवय ॥-५५

वेधा वेद न किञ्चिदद्य स हरिः कुत्रेति न ज्ञायते
दक्षो विक्षत एव सर्वसुरराट् सङ्क्रन्दनः क्रन्दति ।
अग्निर्भग्नदशामनीयत गणो मौनं मुनीनामगा-
दागो नो भगवान् भवान्विपद्दतामेतावदेपामलम् ॥

* उदद्रादिवेति पाठः सुगमः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अपि च ।

अज्ञानात्तत्र तेजसो हर भवन्मायाबलान्धीकृत-
प्रज्ञानां प्रभुताप्रसक्तसुमहागर्वाङ्कुराणामपि ।
अस्माकं बत भस्मसात्कृतपुरप्रगुञ्ज देवेदृशं
विस्मृत्यागः उमापते पशुपते त्रायस्व नस्तावकान् ॥ ५७

यस्त्वया निग्रहो देव कृतोऽत्र सुमहानयम् ।
अनुग्रहस्स इत्येव मन्महेऽद्य महाप्रभो ॥ -५८

इमे विलज्जिता विष्णुविधिशक्रपुरोगमाः ।
निरस्तवीर्यशौण्डीर्या वीरभद्रपराक्रमैः ॥ -५९

इतः पतितेषु पादयोर्विगतगर्वेषु सर्वेषु गीर्वाणेषु ।

किञ्चिदुत्स्मयमानोऽयमश्विनः सकलामरैः ।
निशामयन्विशालाक्षीं वामभागमलोकयत् ॥ -६०

ततः प्रसन्नो भगवान् प्रणतार्तिहरः प्रभुः ।
ऊचे वाचमुदारार्थां किञ्चिदुद्भावितस्मितः ॥ -६१

मा भैष्ट वीरभद्रोऽयं मा भैष्टतस्तदृशं भयम् ।
स्तुतिभिर्वोऽनुरूपाभिरतीव मुदिता वयम् ॥ -६२

अपि च ।

निष्क्रिया निरहङ्कारा निर्व्यापारा निराश्रयाः ।
मद्भिन्नान्यमपश्यन्तः सुखं वयमिहास्महे ॥ -६३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ऐश्वर्येणातिमत्तानामीश्वरत्वमुपेयुषाम् ।
स्थानेष्वधिकृतानां वः स्थाने मोहो महानयम् ॥ -६४

सोढं मदेन मूढानां वोढृणां जगतो भरम् ।
आगो महन्मयैतद्वो भोगश्च स्याद्यथापुरम् ॥ -६५

उत्तिष्ठन्तु सुरास्सर्वे येऽस्मद्दिष्टान्तमाययुः ।
*मेषमस्तपदः शीघ्रमेष दक्षोऽपि जीवतात् ॥ -६६

इत्युक्तमात्रे सति दीक्षितोऽग्नौ
मृत्योर्विमुक्तोऽजशिरा जजृम्भे ।
ततः समुत्तस्थुरुदस्तमोहाः
देवोत्तमा ये निहता गणेन्द्रैः ॥ -६७

भृग्वादयोऽपि मुनयो भ्रमनिर्विमुक्ताः
प्राग्वत्कृतस्तुतिगिरः परमेश्वरस्य ।
अङ्गीकृता विदधुरध्वरशेषमस्य
भङ्गी यथा तदनुरोधमपास्तदोषाः ॥ -६८

उज्जीवितो भगवताऽथ पतिः प्रजानां
सत्या तयैव कबलीकृतवामभागम् ।
आलोक्य देवमपयातमदो महान्तं-
मानम्रमूर्धनिहिताञ्जलिरस्तुतेशम् ॥ -६९

---

* Planting the head of a ram/sheep. (on his neck)

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा ।

अवतं सितशीतरश्मिखण्डा-
वयतं रक्षणपालनप्रवीणौ ।
भवतं भववार्धिकर्णधारौ
भवदङ्घ्रयब्जमरन्दषट्पदस्य ॥ -७०

अनुभूतमनेककोटिजन्म-
स्वतिघोरेषु महत्सुदुःखजालम् ।
अतिखिन्नमलं धिया जगत्याः
पितरौ पातमवश्यमातुरं माम् ॥ -७१

दहनाङ्ग यया मदीयकर्मा-
ण्यखिलानीह परत्र दःखदानि ।
न भवन्ति यथाङ्कुराय भूयः
परिपातं पितरौ तदातुरं माम् ॥ -७२

प्रणन्तुं वेदस्त्वां प्रमथगणनाथेश हृदये
भयं बिभ्रत्पूर्वं प्रणतिमतनो"न्मन्यत्र" इति ।
विभो तत्तादक्षं विधिशिरसि विख्यापितरूपं
कथं वा मादक्षो मदनहरदक्षो वद जनः ॥ -७३

पितृत्वं मातृत्वं तव च गिरिजायाश्च जगतां
विचिन्त्यान्तर्भावं जगति मम चाघापहृतये ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नमस्कर्तुं यत्नं खरनगकभीतेन मनसा
करामीश प्रीतिं कलय मयि कल्याणजननीम् ॥ ७४

हरिब्रह्मादीनामविषयगतिः क्वेश्वर भवान्
क्व चाहं पापानां प्रथमगणनापात्रमधमः ।
तथापि त्वत्कारुण्यश्रवणहृतचेताः शिव भव-
त्पदाम्भोजद्वन्द्वं शरणमुपयातोऽस्मि शिवदम् ॥ ७५

अमर्यादा शम्भो तव भवति सत्यं शृणु वचः
प्रभुस्त्वं भूतानां प्रभवसि सदा सर्वविधिषु ।
भवान्मायाशक्त्या भयपरवशान् रक्षयति चेत्
कथङ्कारं राज्ञि त्वयि सुखमयं वत्स्यति जनः ॥ ७६

उपाध्यायादेवाध्ययननियमोपद्रवशतैः
अधीतेऽप्याम्नाये कथमपि धृते सत्यविकलम् ।
विसृष्टे ब्रह्माण्डे त्वमिति च भिया ह्यदशजनैः
मुमुक्षुत्वे त्याज्यः स पुनरिति कस्ते विधिरयम् ॥ ७७

अपि च ।

क्वचिद्रेतोविन्दुः पतति पुरुषात् कामवशगात्
पुमान्वा स्त्री वा सा पुनरधिककान्तोज्ज्वलवपुः ।
भवान्मयामूढः पुनरयममुञ्जन् प्रतिमुदा
किमन्यत्भ्रान्तत्वे पुरहर निदानं जनिभृताम् ॥ ७८

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शरीरं कान्तानां शरणमरुणाब्जच्छविमनः
प्रमोदाधारत्वात् कुलपतिजनस्तत्परवशः ।
विचारस्तत्र स्याद्यदि विविधमांसास्थिरुधिरैः
समाक्रान्तं त्वक्‌छादयति विपरीता स्फुटमिदम् ॥ -७९

ृतिर्नृते मुक्तिं प्र तजनमिदं काचिदसकृत्
स्फुटं वक्त्यप्यन्या सकलमिदमारोपितमिति ।
ससन्देहे क्ये तत भ ति शम्भो कथमथं
भवन्मायाक्रान्तः प्रभवति यथार्थावगमने ॥ -८०

किन्तु कथयामि ।

यामिच्छत्युद्धर्तुं तमिह सति कर्मण्यपि भवा-
न्नियोक्ष्यत्यस्मिन्नयमपि नरकं प्रापिपयिषुः ।
इति ब्रूते वेदः शिव तव तदास्याद्विषमता
निमित्तत्वापेक्षो निगदति स इत्येव कलये ॥ -८१

परे गुःसद्यो वा व्यवहितपरश्वो दशसु वा
दिनेष्वेकत्रिंशत्स्वपि शरदि वा तत्र परतः ।
अवश्यं साशङ्के वयमिह शरीरे सममता-
हतास्साहंकाराः शिव तव हि मायापरवशाः ॥ -८२

वयःपञ्चाशन्मे षडधिकमभूदद्य भव भोः
यथासिद्धं चायुस्तदुपरि भवेदेव नियतम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कृतं नान्तमध्ये नरकभयनिर्वेदकरण

जराक्रान्ते काये पतितपलो किं नु करवै ॥ -८३

मनः किं वा कर्ता मदनजनक सन्तम हितं

तदाज्ञाकारी वा तदयमपि पञ्चेन्द्रियगणः ।

पदग्धा कामस्य त्वमिह भव तूर्णीं भवसि चेत् ।

कथं कामो जेयः कथमिव तरेयं जनिमृतीं ॥ -८४

यथा जेतुं कामं कलयति मनो मे यमभयात्

यथा भूयः सोऽयं मदयति तदेतन्मनसिजः ।

पुरो भूयो भूयः शिव शिव मया ते निगदितं

नय त्वं नाकं वा नरकमपि वा यत् त्वदुचितम् ॥ ८५

कियत्कालं कीटेष्विह जनिमवाप्याऽयमुरुभिः

सुखादन्यैर्जन्तुर्जठरकुहरे मातुरभितः ।

मलैर्मूत्रैः मांसैर्विलुलिततनुः सस्मृतिरहो

भवन्नाथः सोढा परिभवमसह्यं शिव विभो ॥ -८६

कलेरंशे कल्कप्रकृतिविकले मानवकुले

सराक्रान्ते स्वान्ते सरणरहिते भाविनि विधौ ।

कियत्कृत्याकृत्यं निरयविमुखः स्यां विधिषु ते

न जाने तद्भूयः शिव शिव तवाख्यामि पुरतः ॥ ८७

कामो यद्ययमेष मे वशगतो जेतास्मि सर्वानरीन्

मह्यं द्रुह्यति नित्यमेष भवतो भृत्योऽयमित्येव सः ।

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चेतश्चेन्नन्दनस्य जन्मभवन सर्वस्य लोकस्य ते
   कामारित्वकथा कथ कथय मे मज्जाघटघ्यत्ययमौ ॥ ८८

स्मर्यन्ते नरकाः सहस्रमृपेभिर्नन्वादभमन्वादिभिर्यातना-
   श्चापु स्फुटमुत्पथं गच्छतां वर्णाश्रमाचारतः ।
सत्यं कृ ुल न कर्म गदितं शास्त्रैरहं तादृशं
   तातेशान तवाग्रतो निगदितं सत्यं ततस्त्वं गतिः ॥ ८९

परीक्षां पापे किं मयि वत वराके वितनुषे
   कथं वा मादृक्षः कथय भव तां शक्ष्यति जनः
अयुक्तं मन्ये तत्त्व शिव तदास्तां शृणु वचो
   न दोपः किञ्चिन्मे नरकजनकस्त्वद्गतमतेः ॥ ९०

तमो विद्वद्कल्पाः कतिचन विदुस्त्वां तत इमे
   निकृष्टं च प्राहुः श्रुतिसमयमेतेन च विदुः ।
सकृत्ते पादाब्जस्मरणविधुराघान्नरपशू
   नपि स्प्रष्टुं किञ्चिद्भवति हि तमो नाम हि गुणः ॥ ९१

श्रुतिस्मृत्यर्थान्ये न हि विदुरुदासीनमतयो
   वदन्त्येते विष्णोर्जनिरिति विधेर्नाभिकुहरात् ।
हिरण्यं ते रेतः श्रुतिरिति जगादाण्डमभव-
   द्धिरण्यं तज्जं स्याश्रुच्छतधृतिरयं कस्य तनयः ॥ ९२

जनित्वा कीटादिष्वपि बहुषु योनिष्वयमथ
   क्रमात्प्राप्योत्पत्तिं क्रतुसमधिके ब्राह्मणकुले ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अकृत्वा कर्माणि श्रुतिषु गदितानीश्वर कथं
पर पार प्राप्त शिव तव विहाय स्मृतमपि ॥ -९३

भवन्मायाक्रान्तो भव जलधिमध्ये निपतितः
कथं पारं प्राप्तुं कथय कलये यत्नमवशः ।
अलं बुद्धस्ते यद्यस्त्यहह भवचक्रभ्रमणा
विमोक्तव्योऽसावित्यथ दलय मायायवनिकाम् ॥ -९४

अगाधं द्विरावृत्या पद्यानीमानि ते विभो ।
समर्पितानि तत्प्रीतः सहस्वाऽगो मया कृतम् ॥ -९५

अहङ्कारपराधीनहृदयेन मया विभो ।
विहितानि किलागांसि सहतां सर्वमङ्गला ॥ -९६

जगन्मातरि पुत्रीत्वभ्रमः सर्वजगत्प्रभो ।
जामातृत्वमतिर्देव मायया तव मेऽभवत् ॥ -९७

इति पुनः पुनः विहितप्रणतौ प्रजापतौ ।

दयाभ्यधिकया देव्या प्रार्थ्यमानो महेश्वरः ।
अनुजज्ञे ततस्सप्ततन्तोस्तस्य समापनम् ॥ -९८

तथा हि –

माद्यन्त्यर्थमदेन ये भुवि जनास्तेषां परः स्वो यथा
न ज्ञायेत न चापि नेत्रमरणैरीशः सलक्षं भवेत् ।
तच्चादक्षमदान्धमानसभृता शास्ता न चेदीश्वरः
कस्ताञ्छिक्षितुमुत्सहेत नृपतीन्वा देवतांशान्विना ॥ -९९

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अपि च -

जानामि नो जगति गाङ्गजलावलेप-
लोपाय दीक्षितममुष्य जटातटं कम् ।
स्वीयाभिघातशकलीकृतकालगात्र-
मद्याप्युदस्तनखणं चरणाम्बुजं वा ॥ -१००

ततः

आरुह्य स्वं वृषभमखिलैरीडयमानोऽमरेन्द्रै-
रानन्दाब्धेः परमभिगतं पारमाराद्धुमायाः ।
पश्यन् वक्त्रं पथि परिषदा स्तूयमानो मुनीनां
अद्राक्षीत्सं विधिमुखसुरैः सेवितं राजताद्रिम् ॥ -२०१

यस्यालका पूः पुलकायमाना
चकास्ति चामीकरसालमाला ।
सारूप्यभाजां शशिभूषणस्य
कला भिरिन्दोर्धवलायमाना ॥ -१०२

अपि च ।

पारे परार्धं परमेश्वरस्य
सारुप्यलब्धेन्दुकलेषु यत्र ।
जनेषु वेदागमशास्त्रसिद्धा
व्यर्थीकृता षोडशभागितेन्दोः ॥ -१०३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पुरा यस्मिन्नूक्षः परिवृढभुजादण्डचलिते
पुरारातेर्भूयः प्रपदमृदिते किञ्चिदिव च ।
मुखैः रक्तैः सामन्यपि च दशभिस्तच्छुकगणः
समभ्यस्यैशस्य प्रकटमधियन्ति प्रति मुहुः ॥ -१०४

यस्य प्रभाणां परिणामभेदाः
क्षीराब्धिरिन्दुर्भगणास्तुरङ्गः ।
दन्ती च शक्रस्य दरश्च मुक्ताः
हिमाचलो वारि सुरापगायाः ॥ -१०५

यस्यश्रृङ्गतलसङ्गिमणीनां
भासु भास्करपथे मिलितासु ।
जृम्भते जनमनस्यति वेलं
शातमन्यवशरासनशङ्का ॥ -१०६

ततः स भगवानाद्यो भगनेत्रविभेदनः ।
संस्तूयमानः स्वं वासमाययावम्बिकायुतः ॥ -१०७

॥ इति मायूरमाहात्म्ये चम्पूकाव्ये तृतीयस्तरङ्गः ॥

॥ शुभमस्तु ॥

—•—

॥ चतुर्थस्तरङ्गः ॥

तत्रासीनं गोत्रराजे सभायां
कैलासाख्ये काममाह्लादयन्तम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अम्बां वाक्यैरन्तरङ्गैरनेकैः
रेकान्ते तं पुष्पमासस्मिपेवे ॥ -१

अथोदञ्चति मधुसमये कलरवपञ्चमवञ्चितेषु पथिक प्रपञ्चेषु कञ्चुकितेषु सञ्चितैरिव कुसुमनिचयैश्चूतभूरुहेषुकन्दर्पकालानलज्वालायामिवोल्लङ्घितवेलायां किंशुकप्रसूनमालायां एलालतालिङ्गनलब्धगन्धे गन्धवहस्तनन्धये भागीरथीवीचिमालांपलालिते मन्दं मन्दं चङ्क्रमति संक्रमितेषु समस्तप्रसूनजातेषु [1]दर्पकदूतैरिव षट्पदबृन्दैर्मकरन्दतुन्दिलैरकस्मादागतानन्दभरितेषु दम्पतिकदम्बेषु सम्मोदमानेषु सकलभुवनेषु ।

सुगन्धिमन्दमरुता पल्लवानन्ददायिना ।
प्रथमेनर्तुना तेन प्रमदावदनायितम् ॥ -२

मन्दारमूले मणिवेदिकायां
वृन्दारकेन्द्रैरभिवन्द्यमानम् ।
कदाचिदम्बा कलितप्रणामा
विज्ञापयामास विभुं त्रिलोक्याः ॥ -३

देव भवदीयैर्दिव्यैरव्ययैरकृतकवचननिचयैर्यथावदावेदिताभिधेयैरवधृता एव मया निर्माया: सकला धर्मा:, आकर्णिताश्च, पौराणां तत्र भवता भवतैव वर्णितास्ते ते वृत्तान्ता: ।

कलानां च चतुष्षष्टिर्विलासबहुला त्वया ।
आख्याताः सकला मह्यं व्याख्यातो धर्मसङ्ग्रहः ॥ -४

---

1. दर्पक – Name of Kamadeva.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्र ।

आचारो व्यवहारश्च श्राद्धं वर्णाश्रमस्थितिः ।
प्रायश्चित्तमथाशौचं धर्मशास्त्रं च षड्विधम् ॥ -५

तत्र प्रायः प्रायश्चित्तकाण्डे चित्तदोषेण मत्तानां अत एव कृतपातकानां आगतपश्चात्तापानां मनुजविशेषणामभिहितः पापापनोदनप्रकारः । पापानि च नवधा भिन्नानि तत्र महान्तिपादकानि चत्वार्येव ।

यथा –

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः
महापातकसंज्ञानि च त्वार्यैवोपदेशतः इति ॥ -६

कामकृताऽकामकृतभेदेन तानि च द्विविधानि । रहःप्रकाशकृतभेदेन च । तत्राकामतः प्रकाशकृतानां परिषदनुज्ञापुरस्सरं प्रतितंप्रायश्चित्तम् । कामतः प्रकाशकृतानां महतां पापानां तु मरणान्तैव निष्कृतिः । कामतः कृतानां महापादक व्यतिरिक्तानामितरेषां च द्विगुणेन प्रायश्चितेन । कामतोऽकामतो वा रहस्यकृतानां गुरूपदेशेन, स्वयमभिज्ञश्चेत् । स्वीयेनैव विचारेण । अन्येषामपि दुष्टानां अष्टानामेनसामभ्यासानभ्यासतारतम्येन अनुलङ्घितशास्त्रवचनैः विपश्चिद्भिरेव निण्चेतव्यं प्रायश्चित्तम् ।

किं बहुना ।

दक्षः प्रजेशो निहतस्त्वयाऽयं
वक्षः प्रदेशे शितशूलघातैः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

न वेद्यघं दण्डधस्य हस्ते
दण्ड्यो हि दण्ड्यो विनिपातनीयः ॥ ७

तथा हि –

राजभिः कृतदण्डास्तु कृत्वा पापानि मानवाः
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ।
दण्ड्ये यः पातयेद्दण्डं दण्ड्यो यश्चापि दण्ड्यते
कार्यकारणसिद्धार्थावुभौ तौ नावसीदतः ॥ -८

इत्यादिकैः प्रमाणवचनैः सकललोकनियन्तुस्तव न किञ्चिदघमनुमन्तुमन्तः-
करणं सम्मनुते । किन्तु ।

अहं निमित्तं पितुरस्मि घाते
निहन्तुमेनं मदभून्मनस्ते ।
अतो विनिश्चित्य विधत्स्व मह्यं
त्वं निष्कृतिं दुष्कृतिनोदनाय ॥ -९

अथ भगवानपर्णया वर्णितमाकर्ण्य वर्णयामास । सत्यमेतत्सति त्वया
सम्भाषितम् । विधीयते च तव विधिविहितं प्रायश्चित्तम् । तदेतद्य-
थोक्तमनुतिष्ठन्त्या स्तव विमुक्तिरघतो भविष्यति ॥ तदेतदुपदिशामि ॥

क्रीडामयूर्यामासक्तचित्ता त्वं तनुमत्यजः ।
अतो देवि मयूरीत्वमस्तु वस्तुत एव ते ॥ -१०

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अङ्गीकृत्य मयूरदेहमगजे सार्धं सखीभिः स्वयं
भङ्गीभिर्बहुभिः स्तपश्चर वनीमाशून्यतां वेधसः ।
भृङ्गीभिर्मधुमत्तकोकिलकुलैर ङ्गीकृताभ्यन्तरा-
मङ्गीभूतमनोभवेष्टनगरीमुत्तुङ्गदेवालयाम् ॥ -११

तत्रास्ते मम लिङ्गमद्भुततमं सिद्धैः समाराधितं
सुत्रामादि सुरेश्वरानतपदं सूर्येन्दुकोटिप्रभम् ।
यत्राभ्यर्चनमाचरन् शतधृतिः प्राक् सृष्टिहेतोः स्वयं
स्रष्टुं शक्तिमवाप विष्टपमिदं तुष्टे मयीशे सति ॥ -१२

तदेतदुपहसित संक्रन्दननन्दनोपवनवैभवं सन्ततवित्रासितचैत्ररथोद्यानसौभाग्य-निरन्तरमुन्मस्तकितकोरकैः प्रशस्तमन्दारकुन्दमुचुलिन्दचन्दनस्यन्दनपाटल-प्रभृतिभिः अनेकैरनोकहनिवहैः अतिवेलमुल्लङ्घिताकाशावकाशैः प्रकाश-मानन्रूपप्रदेशमभ्यर्ण एव प्रवहन्त्या विडम्बयन्त्या भागीरथीमर्णवकुटुम्बिन्या कवेरकन्यया देवनद्याधन्यायितं मदभिमतमतिविततं शाम्भवं स्थानम् ॥ तत्र: --

सख्यस्तत्र शिखण्डिन्यो मुख्यस्थलमुपाश्रिताः ।
विनृत्यन्तु पुरस्तष्ते निरस्तनिखिलश्रमाः ॥ -१३

प्रथमं प्रमथेशानाः प्रथमानपराक्रमाः ।
प्रेष्यन्ते भीषणेऽभ्यस्ते काङ्क्षमाणेन रक्षणम् ॥ -१४

तपश्चरन्त्यास्ते तत्र कपर्दिचरणार्चनैः ।
सिद्धिकालो यदा तस्मिन् विद्धि मां पुरतःस्थितम् ॥ -१५

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अहमपि तावन्तं समयं समया कवेरकन्यामुत्तरेण सकलैः कमललोचनप्रभृतिभिरमरैः सह समारूढावृषभराजं भवतीमवलोकमान एव साभिमानमङ्गीकरोमि साङ्गं ब्रह्मचर्यम् । उपदिशामि च तत्वसिद्धान्तमुपासकानाम् । तत्र भवति ।

नीलकण्ठस्य महिषी नीलकण्डी भवाधुना ।
विहर त्वं यथाकामं विहरैव सखीजनैः ॥ -१६

यथार्थीकुरु वचनं भगवतः पाणिनेः "पुंयोगादाख्यायाम्" इति ॥ सपरिहासां भगवतो वाणीमाकर्ण्य सती भगवती लब्ध प्रश्नावसरा स्निग्धमिदमावभाषे देव, विस्मयोऽयं मम, भस्मना धवलिते तव कलेवरे गलैकदेशे कथमियमाविरासीत्कालिमा । न ज्ञातमिदमज्ञया, न विचारितं, च । अद्य तु चिरकालविश्लेषसञ्जातकातर्यया कदर्यया भार्ययापि मया भाषितुं हिताय भूयते ।

दया भदि वदप्रभो वदनिमित्तमस्याधुना
मयापुनरितश्चिरं किलवियुक्तया भूयते ।
कदा तव यथापुरं पदसरोरुहान्तर्गल-
न्मरन्दरस पट्पदीपदमहो गमिष्याम्यहम् ॥ -१७

इत्यतिदीनं वादिन्यां देव्यां भवान्याम् ॥

आलोकयतां स भगवान् त्रिजगद्धरित्रीम्
मात्यन्तखेदगलदश्रुकणाक्षिकोणाम् ।
आनन्दयन् हृदयमाद्रितनूद्भवायाः
चित्रं चरित्रमथतत्कथयाम्बभूव ॥ -१८

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तथा हि ।

य: काश्यपोनाम जगत्प्रतीतः
प्रजापतिर्दक्षसुता नवोढा ।
तत्रादितेर्यज्ञभुजस्समस्तान्
दितेश्च दैत्यान् जनयाम्बभूव ॥ -१९

अन्यासु धन्यास्वपि लोकमान्याः
कन्याश्च वन्यं मृगपक्षिजातम् ।
नागान्नगानश्वगणान् गजेन्द्रान्
यच्चान्यदुच्चावचमाततान ॥ -२०

ततः काश्यपीयैरनाश्यवैभवैरखिलेऽपि विष्टपे विष्टम्भिते ।

ततः स सर्वलोकेशः सुपर्वगणनायकम् ।
अभिषिच्यादितेः पुत्रमन्यांस्तद्वशगान्व्यधात् ॥ -२१

तत्र च सुत्रामसापत्न्या हिरण्य, हिरण्याक्ष, शम्बरविप्रचित्ति, कालनेमि, तारक, नमुचि, महिष, सुम्भ, निसुम्भ, बल, पुलोम, मुर, पाक, प्रभृतयो यथाविभवविहृतयो बलवन्तः कलयन्तो योगं देवराजपदाक्रमणे भगवतो भार्गवस्य मतमुपजीवन्तो दैवबलकालप्रतीक्षाः प्रववृधिरे । अथ देवराजोऽपि दुर्वारगर्वातिशयान् दितितनयाननयप्रधानान् अपतुदन् गीष्पतिधिषणासहकृतया स्वमनीषया सकलानप्यविकलान् स्ववशे कलयामास ।

ततः सम्मन्त्रयामासुः सुत्रामप्रमुखाः सुराः ।
"कथं विनैव दैतेयानमरत्वमयामहे" ॥ इति ॥ -२२

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कृतमतयस्ते कृतिमुद्दिश्य देवा रहसि समुपेत्य प्राप्तकर्तव्यचिन्ता ।

खगपतिरथवुद्ध्या वञ्चयन्तोऽसुरेन्द्रान्
मथनमथपयोधेः कर्तुमुद्योगमापुः ।
दितिसुतरहितैस्तैः मन्थनं क्षीरराशेः
असुकरमनुचिन्त्य प्राहुरेतान् सुरेन्द्राः ॥ -२३

मथितुममृतमब्धे रुद्यताना भवन्तो
यदि सहकृतकार्याः साधयामोऽमरत्वम् ॥ -२४

इति वञ्चयतां देववृन्दानां वचनं दनोः ।
दितेश्च तनया देवान् सत्यमित्येव मेनिरे ॥ -२५

अथ धिषणाऽपि स्वधिषणया दानवानां तातवार्तानिनुष्ठानज्येष्ठाननुवृत्तितां चालोच्य न श्रेय एव समाश्रयिष्यत्येतानिति मतमादितेयानामेव संमानयामास ।

ततः सङ्क्रन्दनो दनुनन्दनानमन्दतरोत्साहान् समाहूय सह च देवेन समस्तलोकरक्षादीक्षितेन सम्मन्त्र्य निर्मन्थनोपायं पयोनिधेरधिक-तरप्रथिमानं मन्दराचलमेव मन्थानं तत्परिवेष्टनरज्जुं च सर्पराजं वासुकिनामानं आकलय्य कलितसङ्केतः पङ्केरुहलोचनानुमतेन पार्श्व-मेकमाश्रयन्तु दैतेया अपरमादितेया इति समया माधवमाधाय पाथोधौ मन्दरं निरूतरं निर्मन्थयामास ।

मथ्यमाने पयोराशौ वध्यमाने फणीश्वरे ।
देवासुरेषु श्रान्तेषु मन्दरे पतितेऽप्यधः ॥ -२६

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सम्मूर्च्छितो जगत्यासन्नस्तदेवासुरेश्वरे ।
अधत्त मन्दरं विष्णुः पृष्ठे कमठरूपधृक् ॥ -२७

अथ विगतश्रमेषु सानन्देषु देवासुरबृन्देषु ।

यथापुरं ममन्थुस्ते सुधाशनकृतादराः ।
विक्षोभितं जगच्चासीच्चुक्षुभे वरुणालयः ॥ -२८

महीभृता मन्दरनामभाजा
विक्षोभ्यमाणे विधुजन्मगेहे ।
पयःकणाः पद्मभुवः सभायां
विभान्ति मुक्ता इव विप्रकीर्णाः ॥ -२९

क्षीराब्धेर्मथ्यमानाददजनि कमला कौस्तुभाख्यो मणिस्त-
द्द्वन्द्वं दत्तं समस्तैर्जगदवनकृते साधु नारायणाय ।
उच्चैरुच्चैःश्रवा यस्तुरगपतिरभूदभ्रमोर्वल्लभोय-
स्तावप्याखण्डलाय त्रिभुवनपतये पक्षिराजध्वजेन ॥ ३०

विश्वस्ता एव ते तस्थुरुन्मत्ता दितिनन्दनाः ।
मन्यमाना वचस्सत्यं वन्यमालाभृतो विभोः ॥ -३१

ततः कल्पतरुर्नाम सङ्कल्पितफलप्रदः ।
प्रादुरासीच्छुनासीर नन्दनोद्यान भूषणम् ॥ -३२

अथ सर्वेषामप्यमरासुराणां "मायम्माय" मिति प्रवृत्ते महति परस्परं कलहे माधवेन नाथेन जगतां, पारिजातोऽयमश्रियाय नन्दनोद्यानं

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पारिजातैः युष्माभिरेव साधारणमुपभुज्यतामिति सर्वाकृतास्सर्वेऽपि सुपर्वसार्वभौमाः । पूर्वदेवाश्च ।

ततःतस्माद्विस्मापित सकललोका निजतनु
प्रभापूरैः क्रूरैरपि च नयनोपान्तचलनैः ।
स्त्रियश्चामन्नाभ्यो जगति युधि शूराशिशनशरः
निकृत्याप्यन्योन्यं त्रिदिवमुपयान्त्येव सहसा ॥ -३३

अथ तांप्सरस्सङ्घैः अतिरूपैरलङ्कृतैः
अलञ्चकार स हरिः नगरीममरावतीम् । -३४

सर्वसाधारणत्वेन तासामप्सरसामपि ।
न वैषम्यमुपाजग्मुः अन्योन्यंदेवदानवाः ॥ -३५

ततः

सन्तुष्टैरिष्टवस्तुलाभेन त्रिविष्टपावासैः कष्टविष्टपानैरतिवेलमाविष्कृतामर्ष-रोषावेशैः आकृष्यमाणवासुकिनेत्रैः विक्षोभ्यमाणक्षीरे सामके तूर्णारे ।

आपातालविघूर्णनक्षुभितभूभारोल्लूठद्भोगिराट्-
कोपोत्क्षिप्तफणासहस्रविगलत्क्ष्वेलातिरेकोल्बणम् ।
अन्तर्वारिधि सञ्चरत्फणिविषव्याप्तं विशीर्यद्दिशा-
चक्रं शक्रमुखान्विमोहयदभूद्धालाहलाख्यं विषम् ॥

यस्मिन्नुत्पतिते न कोऽपि ददृशे नाकौकसां संसदि
श्रेष्ठो विष्णुरभूत्सहिष्णुरपि नो वेधा न वेदान्तरम् ।

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नष्टप्रज्ञमभूच्च विष्टपमिदं सर्वं विषेणामुना
तस्मात्तातदं मामुपेत्य शरणं पेतुः पदाम्भोरुहे ॥ -३७

विज्ञापयामासुश्च ।

अस्माकं त्वमसि त्रयम्भ हि वयं वाञ्छन्त एव स्वयं
क्षीराब्धेश्चक्रमेव मन्दरमथाकर्षेण निर्मन्थनम् ।
तस्मात्कानिचिदुत्थितानि जगतां रक्षाविधौ साधका
न्यद्यो द्विषमत्ति नो द्रुततरं निस्तारयास्मानिति ॥ -३८

तदा किं वर्णयाम्यपर्णे तादृशीमवस्थाममराणाम् ।

विष्णुः कृष्णतनुः पुनःशतधृतिः धृत्या विहीनः क्षणात्
निर्मन्युश्शतमन्युराप्त हविषां भोक्ता तनोरुनपात् ।
आक्रान्ता विषवन्हिनैव सकलाश्चक्रायुधाद्यस्सुराः
तस्मिन्नातनवं मनस्सुरगणाः संरक्षणीया इति ॥- ३९

निष्प्राणेषु सुरासुरेषु सकलेष्वाशावशावल्लभे
ध्वस्तंयात्सु कुलाचलेषु विचलत्स्वत्यन्तन्तमह्ययप्रभां ।
नष्टज्योतिषि दिष्टमेव वलवत्किं कुर्महे भो इति
व्याप्तापत्सु जगत्सु तद्विषमभूदस्माभिरास्वादितम् ॥

आस्वादिते मया तस्मिन् हालाहलविषामृते ।
अमृता एव ते जाताः पितामहमुखाः सुराः ॥ -४१

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कालकूट इति यं विदुर्बुधाः
चक्रवालगिरिसावृणोच्च यः ।
मामके किल गले निवेशित
चित्रमाप तिलकस्य तां दशाम् ॥ -४२

तदेव चिह्नं निहुतहालाहलविषवैभवस्य मम देवस्य ।

अपि च ।

स्रष्टारः प्रथमेऽस्य ये विनिहता नेषां कपालैरहं
माली कालविलोचनेन कलये दाहं यदातस्थुषः ।
लोकस्येश्वरि जङ्गमस्य च तदा भस्मीकृतेऽस्मिन् क्षणात्
एकोऽस्मीह महाश्मशाननिलयो भस्मानुलेपोऽस्मि च ॥

गङ्गा हैमवती तवैव सहजा कल्पान्तरेऽभ्यन्तरात्
आज्ञामब्जभुवस्समेत्य धरणीं याहीति भागीरथीं ।
भेतुं मामतलं समैच्छदगजे तत्तादृशीं तामहम्
रोषादश्रुधुनीमदभ्रसलिलां नामावशेषां व्यधाम् ॥ ४४

गङ्गाधरश्च तेनाहमनङ्गदहने पुरा ।
काले¹ऽग्निगव्युदासीद्यद्विरूपाक्षस्ततोऽस्म्यहम् ॥ -४५

अनेककोटि ब्रह्माण्डभङ्गमेकमभून्मम ।
वासो नाच्छादये ह्येचदाशावसनोऽभवम् ॥ -४६

---

1. अग्निगवि अग्निमये नेत्रे ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उत्कृष्टं वा समानं वा सहृत्य सकलं जगत् ।
मत्तोऽन्यं यन्नपश्यामि तत्तां नूनं शुभाऽऽरभे ॥ -४७

जातानामिह जन्तूनां संसृतां महतीं रुजाम् ।
अन्यैरसाध्यां निर्धूय भिषक्तमतमोऽस्म्यहम् ॥ -४८

इति ते गदितं सर्वमपृष्टमपि भागिनि ।
पुनः शृणुकथाशेषंमशेष सुरचेष्टितम् ॥ -४९

ततः ।

पुनरुत्साहमापन्नाः प्रणम्य मम पादयोः ।
ममन्थुर्वारिधिं भूयः श्रेयसे भूयसे सुराः ॥ -५०

अथोदतिष्ठदमृतं सह तेनामृतांशुना ।
दधे तस्य कलामेकां अलङ्कारविधेरहम् ॥ -५१

एका सापि कला लोके ये मत्सारूप्यमागताः ।
चकास्ति सैव सर्वत्र सामर्थ्यं मम तादृशम् । -५२

अलमति प्रसङ्गेन ।

अनुतिष्ठ यथोक्तं त्वमित्युक्त्वान्तर्दधे विभुः ।
ततः संभ्रान्तचित्तेव दक्षकन्या बभूव सा ॥ -५३

ततो मयूरीत्वमवाप देवी
साधं सखीभिस्सकलाभिरेषा ।
कलापमालाकलितातिशोभा
कपालिनस्तद्वचनं स्मरन्ती ॥ -५४

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रायश्चित्तमघस्य तत्कृतमयेतुं प्राप्तुं कवेरात्मजा-
तीरे शोभितमब्जभूपरिचितं स्थानं महच्छाम्भवम् ।
आश्रित्याम्बरवर्त्मपक्षनिचयं गक्षिप्य मेघावली-
गयान्नी पुटभेदनं पुरारिपोरालोकतार्थे पथः ॥ -५५

या काशीति चकास्ति यागमथितुश्शूलाग्रसन्धारिता-
पाकारिप्रमुखैरपाकृतसुधासारैः सदा सेव्यते ।
आकाशे पृथिवीतलात् प्रथमभुवीहोदकस्वर्धुनी-
पाथश्शीकरशोभितावनिकरैराक्रान्तवीर्यान्तरा ॥ -५६

अपि च ।

कल्पान्तकाले करुणार्णवस्य
संहृत्य सर्वं जगदीश्वरस्य ।
विनृत्यतो नृत्तमवेक्ष्य हर्षा-
दम्बा भवद्यत्र विशालनेत्रा ॥ -५७

अपि च ।

पूर्वं कापिलकोपवन्हिशिखया भस्मीकृता ये नृपाः
तेषां स्वर्गमने विनिश्चयभृता दैलीपिना भूभृता ।
आनीत तपसा ह्वाम्बरभिदातो जह्नोश्च भार्यात्मजा-
भावं प्राप्य भवस्य सेवनकृते यस्यामुदग्वाहिनी ॥ ५८

व्यासाद्यैर्विविधैस्तपस्विनिकरैः पूजाविधावुद्यतैः
भर्तुस्तस्य पदे पदे विनिहितैः लिङ्गावलीनांश्चयैः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पञ्चक्रोशतलेषु सञ्चितमहाघोराघविध्वंसनैः

संपूर्णा जगतां त्रये पृथुयशाः नाभाति काशीति या ॥ ५९

तत्र ।

कन्याः काञ्चन काञ्चनांगदधरा मान्यास्त्रिलोकीजनैः-

अन्या धन्यतराकृती रतितरामालोलहारोज्वलाः ।

वृन्दवृन्दमुपागताः कुहचन प्रस्थातुकामा इव

प्रेक्ष्योत्कण्ठितमानसा समभवद्देवी मयूरी तदा । ६०

अथ सा लोकमान्यानां कन्यानां हृदयंगमम् ।

सङ्गमं प्रेक्ष्य तत्कृत्यविचारणपराऽभवत् ॥ -६१

तत सखीभिस्सह मन्दं मन्दं सञ्चरन्त्यां विचिन्तयन्त्यां वञ्चयन्त्यांमचिन्त्य-
लावण्यमवलाकदम्बमम्बायां मयूर्याम् ।

अन्योन्यमासीदालापस्तासां हलाहलाशनम् ।

देवं प्रत्येव बहुधा रुदन्तीनां पदे पदे ॥ -६२

ततस्तास्सह सङ्गम्य गङ्गया लोककान्तया ।

तयैव सार्धमर्धेन्दुभूषमीशानमीडिरे ॥ -६३

विलोक्य ताः विस्मितपद्मवक्त्रः पप्रच्छ देवः परिहासपूर्वम् ।

त्यक्त्वैव भर्तारमिहोपयाताः तद्ब्रूत नद्योऽद्य यथातथं नः ॥

नतः -

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विज्ञायाज्ञां देवदेवस्य नद्यः सद्यो हृद्यं वक्तुमारेभिरे ताः ।
आज्ञप्तास्स्मः देव पापापनोदे पापिष्ठानां पालयामस्तवाज्ञाम् ॥

किञ्च ।

अपनोदयन्तु चिरमेनसां
चयानपि नोदयन्तु जननीजनाः ।
वयमीशकृष्णवपुषा
यदा स तत् सरितांपतिश्च न स नस्समीक्षते ॥ -६६

अबला वयं यदि बलेन सागरं
पतिमाश्रयाम मुदितास्स्वयं प्रभो ।
स च नीलनीलजलराशिरंहसा
निचयेन नः समभिहन्ति वीचिभिः ॥ -६७

परकीयेन पापेन दग्धानां भवदाज्ञया ।
विधत्स्व देव नः प्रायश्चित्तं तत्पापशान्तये ॥ -६८

ततः ।

नदीभिरतिदीनाभिरिति संप्रार्थितो विभुः ।
इत्यवादीदसह्याघशान्तये यात सह्यजाम् ॥ -६९

सा हि ब्रह्मवनाह्वाने स्थाने मल्लिङ्गचिह्नते ।
प्रवहत्यधिनामंहःसंहृतौ कृतसौहृदा ॥ -७०

वर्षे वर्षे तुलाभानौ दर्शे मध्यङ्गते रवौ ।
निमज्य यूयं तत्सर्वं निर्वापयत पातकम् ॥ -७१

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

इत्थं वादिनि सिद्धपूजितपदे देवे नदी नाकिनां
क्रुद्धा रुद्धगलज्जलकणा रक्तेक्षणान्ता तदा ।
मध्ये प्रेमरुषोः स्वयं स्थितवती गम्भीरमृद्वक्षरं
सेर्ष्यालोकनघूर्णितभ्रुकुटितं प्रोवाच लोकेश्वरम् ॥ -७२

कथमेतदुदाहृतं प्रभो
कथयेशान वृथावचस्त्वया ।
प्रभुतामवलम्ब्य केवलं
वनितानामभिमान नाशनम् ॥ -७३

तथा हि ।

क्वाहं सिद्धसुरेन्द्रवन्दितपदा मन्दाकिनी त्वद्धृता
मूर्ध्ना पातकिपातकेन्धनशुचिज्वालायिताम्भःकणा ।
क्वैषा सह्यगिरेःसुता परिवृता मर्त्यैरसत्यास्पदैः
सापत्न्याढ्यमतिः कथं नु विषहे तस्यां वगाहं विभो ॥ ७४

न विज्ञातमेव भवता भव स्त्रीणां तत्तादृशं हृदयम् ।

तथा हि ।

आश्रयेण सपत्नीनां आरोहो गजवाजिनाम् ।
भविता यदि तद्ब्रूम न स्त्री स्त्रियमपेक्षते ॥ -७५

तदलं वचनं तवेदृशं गतिरन्या यदि नो वद प्रभो ।
न यदि क्षयमेमि पातकैर्हृदयं निर्वृतमस्तु तावकम् ॥ -७६

CC-0 Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

इत्यतिरोषं भाषमाणायां भागीरथ्यां ।

साकूतस्मितवीक्षणेन हृदयं तस्याः पुना रञ्जयन्
प्राह प्रेमभरादितः प्रणयिनीमम्भोनिधेः प्राक्तनीम् ।
मा रोषं कुरु भामिनि त्वमधुना खिद्यस्व मा यन्मया
प्रोक्तं कारणमत्र वच्मि तदिदं सश्रद्धमाकर्ण्यताम् ॥ ७७

तथा हि ।

अतनुत विधिमेषा प्रीतमुग्रैस्तपोभि
स्तदनु स च समक्षं प्रदुरासीदमुष्याः ।
वरमवृणुत गङ्गाऽऽमज्जने मे वारि शुद्धा
भवतु गदितमस्त्वित्येव तेनेश्वरेण ॥ -७८

तदिदं कथमस्माभिः
अन्यथा कर्तुं शक्यं विधातृ विहितम् ।
तन्मौनमेव शरणम्
मानिनीनां सागरकामिनीनाम् ॥ -७९

इत्यादिष्ट देवदेवेन गङ्गा
सार्धं रुद्धाऽऽकाशमभिर्नदीभिः ।
प्राप्तं भानुं सप्तमं राशिमारात्
ऊरीचक्रे सह्यजातिर्थयात्राम् ॥ -८०

ततस्तासु समस्तासु प्रशस्तासु नदीष्वपि ।
यान्तीष्वुमा मयूरीभिः गौरी ताभिस्सहाययौ ॥ -८१

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ततो भगवतः परमेष्ठिनो यागनुष्ठानवरिष्ठां प्रयागाभिधानां राजधानीमालोकयन्ती नन्दगोपनन्दनपदकमलनिरन्तरपरिमर्दनलब्धकालिम्नः कालियाभिधानस्य काकोदरपतेः आकल्पितमदनां यमुनां तदन्तः प्रवाहवतीं सरस्वतीं उत्तुङ्गतरङ्गमङ्गतैः समन्ततोऽवारीं गोदावरीं सकृदवगाहनमात्रेण समस्तलोकदत्तभद्रां तुङ्गभद्रां वेणीविमोहितसागरां कृष्णवेणां अन्याश्च धन्याः सागरकुटुम्बिनीः कवेरकन्यातुङ्गतरङ्गशीकरशीतलीकृतविमानं भगवतः परमेशितुः आवासमाससाद ।

यस्मिन्नाविरभूदहन्यगसुता ब्रह्माटवीनामनि-
स्थाने चित्रकलापचित्रिततनुः सार्धं सखीनां गणैः ।
तस्मिन्नेव दिने भवोऽपि भगवानारूह्य वाहं वृष-
श्रेष्ठं मध्यमुपेत्य सह्यदुहितुस्संस्मारनाकौकसः ॥ ८२

॥ इति मायूरमाहात्म्ये चम्पूकाव्ये चतुर्थस्तरङ्गः ॥

॥ शुभमस्तु ॥

॥ पञ्चमस्तरङ्गः ॥

आविरासन्नथेशान्याः सन्निधाने सुराङ्गनाः ।
मायूरीं तनुमाश्रित्य नृत्यन्त्यो विधिकानने ॥ -१

अथैकांशेन भगवानङ्गीकृत्य कलापिताम् ।
सहायैरमरेशानैः आम्रानोकहमाश्रयत् ॥ -२

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तदन्तिके तरुं चान्यं मशिश्रयदगात्मजा ।
साकं मयूरकन्याभिः मन्यमाना महःशुभम् ॥ -३

अन्येनांशेन भगवानारूह्य वृषवाहनम् ।
तीरमुत्तरमासाद्य तस्थौ दक्षिणदिङ्मुखः ॥ -४

ततः ।

अवसाने शुचेरर्ककिरणैरवनीतले ।
सन्तप्ते समभूत्कालः कोलाहलवलाहकः ॥ -५

अथ कादम्बिनीकदम्बेन कवलीकृतेषु दशसु दिगन्तरेषु निरन्तरमुदञ्चिततटि-
द्दीपिकाविलासप्रकाशीकृतसङ्केतमार्गेष्व अभिसारिकानिकुरुम्बेषु परस्पर-
स्पर्धयेव वर्धमानप्रवाहेषु नदीनदेषु इन्द्रगोपकलुषीकृतसरण्यां धरण्यामपि
इन्द्रकोपवरेण्यायां उन्मदकेकालापेषु कलापिकलापेषु नृत्यत्सु लब्धनामनि
''मयूरीनृत्तनगर''मिति कमलासनकानने ।

नीरध्वनिमृदङ्गनिनादो विद्युदूर्जितकशो जलतैलैः ।
अर्द्रिताङ्गलतिकाः शिखिकन्याः कालनाट्यविदनर्तयदुर्व्याम् ॥

ततः ।

स्नात्वा सह्यसुताजले प्रतिदिनं कालत्रये केकिनी
गौरी पद्मवनान्युपेत्य कमलान्याहृत्य चञ्च्वा स्वयम् ।
अभ्यर्च्यायतलोचना पशुपतिं लिङ्गे विधात्रार्चिते
नृत्यन्ती कलयाञ्चकार नितरामानन्दमात्मेशितुः ॥ -७

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

इत्थं चरन्त्यां गिरिकन्यकाया-
मागानिवृत्त्यै व्रतमीशदृष्टम् ।
व्यतीयुरब्दा बहवोऽपि तत्र
रेमे कलानाथकलावतंसः ॥ -८

यस्मिन्नाम्रतरौ निवासनतनोद्भवा मयूरी चिरं
तस्यैवाभिमुखे तरौ समवसद्देवोऽपि देवैस्सह ।
अङ्गीकृत्य मयूरविग्रहमविज्ञातो गिरेः कन्यया-
तस्यैवेत्य गणाधिपो निजगणैर्मूलं समध्यास्त सः ॥ -९

कुमारोऽपि ततस्तस्मिन् समारोपितकार्मुकः ।
मयूरान्वाहिनीं कुर्वन्व्यचरन्मृगयां वने ॥ -१०

अथ भगवानचिन्त्यवैभवो भवोऽपि विहितरक्षणो भवान्याः कन्यायाः कवेरस्य तटे उत्तरस्मिन् वटमूले कटकीकृतभोगिराजेन कराम्बुजेन कलयन् कामपि चिन्मुद्रां भद्रां विद्रावितापज्ञानबीजां मौनेनैव मुनीनां वैयासिकप्रभृतीनां अव्याजकरुणानिधिरारुह्य नन्दिनमानन्दयन् वृन्दारकान् आलोकमान एवं कालम् अवलोकमानो गिरिजाम् अङ्गीचकार चिरमवस्थानम् ।

ततः ।

सप्ताश्वेऽपि सप्तमराशिमुपागते: ।

आबालगोपालमघापनुत्त्यै
समेत्य सह्यद्रितनूद्भवायाम् ।

तांस्तान्विमुक्ताघगणान्समस्ता-
नालोक्य गौरीशिखिनी तु तेषु ॥ -११

अपि च ।

अथामर्त्यसरित्प्रभृतीरपि समस्तानदीर्मत्यैरविज्ञातमेव निमज्य सहृयजाथां असहृयैरवजालैर्विमुक्ताः मुक्ताश्च लैव्यवैरूपलक्षितः समक्षमवलोक्य दाक्षायणीं कलयन्ती मनसा कमलोद्भवलिङ्गमहिमानं कवेरमहाराजकुल-प्रतिष्ठामावहन्त्या वहन्त्याः वैभवं भवस्य देवस्यापि तत्तादृशमनुशासन-मनुमुमुदे ।

सत्यं वचोऽमर्त्यसरिन्निमित्त-
प्रोक्तं न तत्रास्त्यनुमानगन्धः ।
ततो निवासोऽस्तु ममेह नित्यं
देवेन सार्धं दयतां विभुर्मे ॥ -१२

इति संप्रार्थितमङ्गलायां सर्वमङ्गलायां समयप्रतीक्षे सति भगवति विरूपाक्षे । अविस्मृतदक्षाध्वरशिक्षेषु सहस्राक्षप्रमुखेषु सबर्हिष्षु भगवताज्ञानुरोधेन रोधस्सु कवेरकन्यायास्तत इतः सञ्चरत्सु संत्यक्तत्रिविष्टपकार्यारम्भेषु ।

तस्मिन् काले तारको नाम दैत्यो
भस्मीकुर्वंस्तेजसा सर्वलोकान् ।
आक्रम्य स्वर्देवराजाधिपत्यं
चक्रे शक्रं त्रासयित्वा सचक्रम् ॥ -१३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स्थाने भानोः भानुनामानमन्यं
दैत्यं कृत्वा दानवानामधीशः ।
मृत्योर्व्यत्यासं च कृत्वा सचक्रं
देवं जेतुं दैत्यहन्तारमैच्छत् ॥ -१४

दिक्पालत्वं बालकैः कारयन् स्वैः
अम्भोजाक्षस्थानमाक्रान्तुकामः ।
शम्भोः प्रीत्यै सह्यजायाः तटान्ते
सन्तं देवैस्तं स शुश्राव देवम् ॥ -१५

तत्रापश्यन्त्रत्रैरिप्रधाना-
नन्यान्देवान्वासुदेवं च दैत्यः ।
आकर्ण्यायं नारदात्तान्मयूर-
काराकारानारुरोधाटवीं ताम् ॥ -१६

ततः सुगन्धकानने शयन एव सुन्दरे ।
निलिम्पवैरिकम्पनो निरस्तवैरिमत्सरः ।
निलीय गह्वरे क्वचित्सुखं तनूद्भवक्षतिम्
विचिन्त्य षण्मुखेन तामुवास पङ्कजेक्षणः ॥ -१७

अथ सर्वैरपि सुरसार्वभौमैः अरागतानन्दैरागत्य गत्यन्तरविनाकृतैः अपाकृत-
पराक्रमैः असुरप्रतापातिशयेन सङ्क्रन्दनपुरोगैः देव, केवलमवलम्ब्य
ःवरप्रदानमब्जभुवः :तारको नाम मारकोऽस्माकं आक्रम्य शक्राधिपत्यं

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अन्यानपि युष्मदर्थानानाकर्ण्य नारदात् आवृत्य विधातृकाननमाकुली-करोति नस्तन्निवारय तारकमिति पुनः पुनः वन्द्यमाने नन्दीशवाहने देवेशाने ।

ततः ।

दयया देवदेवस्तन्निवर्हणकृते सुतम् ।
वर्हिवाहनमाहूय वह्निर्मुखकृतेऽदिशत् ॥ -१८

तारको नाम दैत्येन्द्रो बाधते देवताः परम् ।
अवारितबलोपेतस्तं वारय ममाज्ञया ॥ -१९

सशूरपद्मः सचसिंहवक्त्रो
यस्तारको नाम वरप्रधानः
एतानपेतानुग्रवीर्यजाना
न्नियम्य तान् संयमिनीं नयेते ॥ -२०

इत्यादिष्टो देवदेवेनः मन्द-
स्मेरालोकाऽलङ्कृतः स्कन्द एषः ।
दत्तं चेन्मे देवसेनाधिपत्यं
हन्ता दैत्यानित्यवादीदमन्दम् ॥ -२१

ततः त्रिदशपुङ्गवाः दशशतेक्षणाद्यास्तदा
पुरः पुरभिदो मुदा सपदितेऽभ्यषिञ्चन्नमुम् ।
पदे पदनतासरे सकलदेवसेनापतिं
शिखिध्वज मधूधुवन्नथ सुराः स्ववस्त्राञ्चलान् ॥ -२२

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अभिषिक्तो ततः स्कन्दे नन्दश्चन्दनभूरुहात् ।
आववौ मरुतामार्तिविच्छेदनकरो मरुत् ॥ -२३

अथासुरान् हन्तुमभि प्रयाते
सेनापतौ दानव राजसेनाम् ।
प्रपेदिरे दशशकुनानि भूयो
भौमानि दिव्यान्यपि शाकुनानि ॥ -२४

दुर्निमित्तानि सर्वाणि निर्निमित्तानि दानवाः ।
अचिन्तयन्तो युद्धाय बद्धश्रद्धाः समापतन् ॥ -२५

अथ दनुजसेनासु समन्ततस्समापतन्तीषु ।

ततः

नन्दनोऽपि मन्दाकिन्या संक्रन्दनमेव मयूरमारुह्य च वरमर्मनिर्मथन कर्मण्यकुण्ठित शक्ति शक्ति कृत्तिवाससमानसारो भगवानाविष्ट एव संहारशक्त्या मिषतामखिलानामप्यनिमिषाणां अमरारीनपि मारयन् विसारयन्सर्वतश्चक्षुः द्याशूशुक्षणि समान तेजांसि सिंहवक्त्र शूर पद्मनामानौ राजानौ दनुजानामाजौ विनिकृत्तशिरस्कौ विनिपात्य तारकमपि विगततारकं विधाय विधारयामास ।

कालुष्येण विनाकृता त्रिजगती जाता तदा नाकिनः
प्रीता वीतभया विचेरुरभितो भीता दनोर्नन्दनाः ।
पातालं विविशुः प्रणम्य शिरसा स्कन्दं महान्तं विभुं
तन्मुक्तास्तरुणेन्दु भूषितशिरा देवः प्रपेदे मुदम् ॥ -२६

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ततः

संप्राप्ते समये सत्यास्म्यसंयोगे महेश्वरः ।
तपस्यन्तीं वयस्यां तामङ्गीकर्तुं मनो दधे ॥ -२७

कदाचिन्माधवे मासि मुदाभ्यर्च्य महेश्वरम् ।
विनृत्यन्त्यां सतीदेव्यां ननर्त भगवान् पुरः ॥ -२८

साक्षादिन्दुकलाधरः स भगवानीशः पुरस्तात् गिरेः
कन्याया विननर्त तत्र समये साक्षा दभूत् सा सती ।
ब्रह्माद्याः सकलाः सुराः समभवन् प्रत्यक्षमस्येशितुः
स्तस्मिन् ब्रह्मणि नादा समभच्चित्रं महानुत्सवः ॥ -२९

ततः

प्रायश्चित्तमवाप्य सर्वजननी स्तुत्वा महान्तं विभुं
स्तोत्रैर्वैदिकतान्त्रिकैर्बहुविधैस्तस्मिन् प्रसन्ने सति ।
वत्रे वास इहास्तु ते सह मया नित्यं पुनः पूरियं
मन्नाम्ना भवतादिहास्तु वसतामाशानुरूपं फलम् ॥ ३०

अन्योऽपि च वरो मह्यं मान्यो देयो महेश्वर ।
नमस्कृत्य पुरस्तान्मां नमन्तु त्वां महाजनाः ॥ -३१

इति संप्रार्थितो देव्या प्रदाय सुबहून् वरान् ।
ऊचे वाचं मुदा देवीमानन्दभरितो विभुः ॥ -३२

अस्तु भगवति भवत्या यदुक्तं (तत्) तथैव ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तथा हि ।

गौरीमायूरमित्येव पुरं भवतु विश्रुतम् ।
पुराणेषु समस्तेषु पुनर्वाराणसी समम् ॥ -३३

अभयाम्बेति ते नाम भविता विदितं भुवि ।
मयूरनाथ इत्येव भविष्यति ममाभिधा ॥ ३४

आरुह्य वृषभं पूर्वमागतो यत्कवेरजाम् ।
तदेतद्वार्षभं तीर्थमस्तु त्रैलोक्यविश्रुतम् ॥ -३५

उत्तरस्मिन् पुनस्तीरे त्वया सह मनोरमे ।
आसे कवेरकन्यायाः कलयन् महितं यशः ॥ -३६

ये नराः सह्यजां प्राप्य स्नात्वा वृषभतीर्थके ।
ब्रह्मतीर्थे सकृत्स्नात्वा नमस्कृत्याभयाम्बिकाम् ॥ -३७

अनन्तेश्वरं प्राप्य नाथशर्गेश्वरं पुनः ।
ब्रह्मलिङ्गं समासाद्य नमस्कृत्य यथाविधि ॥ -३८

मायूरनाथमासाद्य मुक्तिं यास्यन्ति मानवाः ।
वैशाख्यां पौर्णमास्यां यदाविर्भूतं मया सति ॥ -३९

उत्सवो भविता तत्र दिने मम सह त्वया ।
तुलाराशिं गते भानौ दर्शे मध्यं गते रवौ ॥ -४०

निमज्य वार्षभे तीर्थे मुक्ता स्याज्जनता सदा ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तुलां समाक्रामति सप्तसप्तौ
त्वया समेतो वृषभाधिरूढः ।
अलङ्करिष्ये कलयन्प्रमोदं
तीरं कवेरस्य तनूद्भवायाः ॥ -४१

इति दत्ते वरे गौरी सुताभ्यां सह सङ्गता ।
सिंहासनं समध्यास्ते वामपार्श्वे महेशितुः ॥ -४२

अथ देवा महादेवं मुनयश्च समाहिताः ।
वर्णयामासुरानन्दभरिताः सोमशेखरम् ॥ ४३

सौवर्णमण्डपे दिव्ये महनीयमहासने ।
मन्दारतरुशाखाभिराच्छादितदिगन्तरे ॥ -४४

मणिदीपसहस्राढ्ये मलयानिलसेविते ।
माणिक्यरचितस्तम्भसहस्रसमलङ्कृते ॥ -४५

मणितोरणमाङ्गल्ये चतुर्द्वारसमन्विते ।
गन्धोदकपरिक्लिन्ने दीपिकाशतसङ्कुले ॥ -४६

तत्रापश्यन् महादेवमाम्बिकापतिमीश्वरम् ।
कोटीरमणीयापूरनिरस्तरविकोटिकम् ॥ -४७

तदाकलितशीतांशुकलाभासितदिङ्मुखम् ।
अवतंसितपीयूषकरस्पर्धयनिलाशनम् ॥ -४८

कस्तूरितिलकोद्भासिललाटनयनं विभुम् ।
सूक्ष्मरेखामनोज्ञश्रीशुभ्रभस्मत्रिपुण्ड्रकम् ॥ -४९

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कर्णलम्बितसौवर्णकुण्डलीभूतवासुकिम् ।
कारुण्यामृतधारार्द्रकटाक्षललितत्रिपम् ॥ -५.०

चाम्पेयकुसुमाकारनासादण्डविराजितम् ।
गण्डस्थलश्रीविजितदर्पणद्युतिमीश्वरम् ॥ -५.१

ताम्बूलरागसंसक्तदन्तच्छदमनोहरम् ।
कुन्दकुड्मलपङ्क्तिश्रीजैत्रदन्तावलिद्वयम् ॥ -५.२

मन्दस्मितप्रभापूरप्रकाशितदिगन्तरम् ।
माणिक्यमुकुलाकारचिबुक श्रीविराजितम् ॥ -५.३

हालाहलाऽऽनीलगलं हारभासितवक्षसम् ।
वामदक्षिणपाण्यग्रराजन्मृगपरश्वथम् ॥ -५.४

अभीतिवरदं शम्भुमानन्दामृतवारिधिम् ।
कनकाङ्गदकेयूरकटकादिलसद्भुजम् ॥ -५.५

रत्नाङगुलीयकरूचिराजदङ्गुलिपल्लवम् ।
प्रवालमौक्तिकोन्मिश्रमूक्ष्मरुद्राक्षधारिणम् ॥ -५.६

त्रिवलीललितोदारनाभिराजन्मृदूदरम् ।
नवकुङ्कुमपङ्काक्तचन्दनालिप्तविग्रहम् ॥ -५७

व्याघ्रचर्मोत्तरीयतदिव्यक्षौमलसत्कटिम् ।
सौवर्णकिङ्किणीरम्यरशनादामभूषितम् ॥ -५.८

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चारूरुजङ्घं चार्वङ्गं चारुपादतलं विभुम् ।
वामाङ्काधिष्ठितस्कन्दगिरिजावामभागकम् ॥ -५९

शिञ्जन्मणितुलाकोटिलसत्पादसरोरुहम् ।
रजताचलसंदेहसन्दोहवृषवाहनम् ॥ -६०

गृहीतकनकच्छत्रकुण्डोदरसुवन्दितम् ।
गृहीतचामराग्र्याभिः स्मरीभिः सुवीजितम् ॥ -६१

नृत्यद्गन्धर्वतन्नारीगणसंस्तुतवैभवम् ।
वेदान्तविन्मुनिगणस्तूयमानयशोगुणम् ॥ -६२

पद्मभूपद्मनाभेन्द्रमुखदेवैरभिष्टुतम् ।
आलोक्यालोक्य जगतां त्रयमीशमवन्दत ॥ -६३

इति संस्तूयमानोऽसावखिलैरमरेश्वरैः ।
मुनिभिश्च वरानिष्टां स्तुष्टोऽदत्त दयानिधिः ॥ -६४

इति दत्वा वरं देव्याः सर्वेषां च वृषध्वजः ।
सन्निधत्ते तया सार्धं अम्बया लिङ्गरूपधृक् ॥ -६५

ततः प्रभृति धातुस्तत्काननं जगदीडितम् ।
गौरीमायूरमित्येव प्रथितं भुवनत्रये ॥ -६६

चोलावनीभूषणमिन्दुमौलेः
सानिध्यतस्सज्जनसंवृतान्तम् ।
कवेरकन्यातटशोभि गौरी-
मायूरमित्येव पुरं चकास्ति ॥ -६७

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्राऽभयाम्बामहितः समस्ता-
न्त्सदानुगृह्णन्मतिरैः कटाक्षैः ।
कपर्दनित्याऽऽकलितेन्दुखण्ड-
प्रभाप्रकाशीकृतदिक् समिन्धे ॥ -६८

रम्भासु यस्मिन्रतिनाथजैत्र-
[1]पताकमालासदृशच्छदासु ।
विद्योतमानासु तदेकरम्भं
स्वर्लज्जयेवाद्रिशिरोऽध्यतिष्ठत् ॥ -६९

सह्यात्मजायाः सलिलप्लवेन
यस्यामघिभ्यः सततं जनेभ्यः ।
प्रदातुमर्थं निजदेहसाम्यं
सूर्यस्तुलारोहणमातनोति ॥ -७०

अपि च ।

मखेषु यस्मिन् विहितैर्महद्भि-
र्वितन्यमानेषु विधानपूर्वम् ।
भुक्त्वा हविर्भूरिपुरन्दराद्याः
नाकौकसो निर्जरसो बभूवुः ॥ -७१

---

1. पताकाशब्दस्य स्त्रीत्वमेव प्रसिद्धम् । पुंस्त्व प्रयोगोऽत्र विमर्शार्हः ॥
स्वरस्वर्गलोकः तदेकरम्भं सा एका रम्भा यस्मिन् । स्वर्गलोकः यत्र एकैव रम्भा योऽयमवतीर्णश्च आसीत् सतीशाम्ब्यो समागमदर्शनाय स इदानीं बहुमङ्गलाकररम्भावतत्क्षेत्रं दृष्ट्वा लज्जया इव आद्रिशिरः मेघमण्डलोद्भवभागं अधितिष्ठति स्म ॥

CC-0T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पुरा खलु पुरारिपदपरिचरणधुरन्धरो नाथशर्मा नाम नाथो अनवद्यानां विद्यानामपि समस्तानां आस्थानभूमिः स्थानानामपि शाम्भवानां गीत-भगवन्महिमा हिमांशुकलालङ्कृतकपर्दजनार्दनप्रभृतिभिः अमरैः सनक-सनातनसनत्कुमारमुखैः योगिवृन्दैः वन्दितचरणारविन्दं भगवन्तं भगनेत्र-भञ्जनं देवमन्तस्सन्ततमनुसन्दधानो वसानो वसने चीरे चिरमङ्गीकृत-गृहस्थाश्रमः तदनुपरिगृहीतवनस्थधर्मः अगस्त्यादीनपि समस्तान् स्मृताभिमानान् तन्वानो वृद्धश्रवःपुरस्सरैरमरैः सिद्धैरपि सदा सेविते वृद्धाचलाभिधाने पञ्चशरातिपञ्जरे पञ्चनदाभिधाने स्थाने च चिरं कृत-वस्थानं तत्र तत्र मुक्तिमलभमानो भानोः तुलाप्रवेशमवलोक्य त्रैलोक्य-जनकृतबहुमानं त्रिभुवनैकनायकस्य नरकारिसायकस्य गौरीमायूरं नाम भवनं आसाद्य स वने सवने कुर्वन् शर्वस्य समाराधनं प्रतिष्ठाप्य च वरिष्ठं लिङ्गमनवद्यं अनवद्यया भार्यया स्वयमपि समया तल्लिङ्गं समीयाय यत्र विदेहकैवल्यं यत्र च सुत्रामा वित्रामितो वृत्रहत्यया कुत्रापि सुखमलभमानः सत्राशनगुरुणा एत्रा चित्रप्रवाहायां कवेरकन्यायां चित्रापरार्धे विहरति मिहिरे दर्शे गगनमध्यमध्यारूढे भगवति गभस्ति-मालिनि तत्रभवत्यां भागीरथ्यामपि तदादिभिः महानदीभिः साकं आगत्य निजाघनिवृत्तये स्नान्त्यां यान्त्यां च निर्मलतामवगाह्य व्यपोह्य च सकलमघजालं अवलोक्य च कमलोद्भवलिङ्गं आकर्ण्य च वैभवं मयूरनाथस्य नाथमान एवात्रैव निवासं अवाप्य पुनः पुरममरावतीं समध्यास्त त्रैलोक्यसाम्राज्यम् ।

इति निगदितमेतत्स्थानमाहात्म्यमिन्दोः
शकलकलितभूषातोषिताद्रीन्द्रजस्य ।

CC-0.Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भगवत इह मुक्तः साधनं चैव मुक्तेः
सकलभुवनरक्षादीक्षितस्यास्तु वः श्रीः ॥ -७२

इत्याकर्ण्य महेशस्य वैभवं सूतभाषितम् ।
गौरीमायूरमाहात्म्यं मुमुदे मुनिमण्डली ॥ -७३

इति विरचितमप्पादीक्षितेनेश्वरस्य
क्षितिधरपतिकन्यामान्यवामाङ्कस्य ।
गुणगणमणिमालालङ्कृतं गद्यपद्यैः
धरत हृदि बुधेन्द्राः साधु चम्पूप्रबन्धम् ॥ -७४

सन्तश्चमत्कृतिमिमां सरसार्थपद्य-
गद्ये चमत्कृतिमुमाक्रमितुर्गुणाढ्याम् ।
आलोक्य मत्सरविनाकृतबुद्धियोगात्
तुष्यन्तु मत्सरसतापरितुष्टचित्ताः ॥ -७५

॥ इति गौरीमायूरमाहात्म्ये चम्पूकाव्ये पञ्चमस्तरङ्गः ॥

॥ हरिः ओम् ॥

॥ शुभमस्तु ॥

इतिविलिखितमेतद्गद्यपद्यात्मकं सत्
सरससुभगसूक्तिस्फूर्जितं चम्पुकाव्यम् ।
परमशिवपदाम्भोजातभक्त्योपगुह्यं
विलसतु चिरमस्मिन् भारतीमन्दिरेऽस्मिन् ॥ -७६

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ पद्यानुक्रमणिका ॥

श्लोकः		श्लोक-संख्या	पुट-संख्या
अङ्गीकृत्य	...	11	62
अज्ञानात्तव	..	57	49
अज्ञानामग्र	..	7	2
अज्ञानिना मया	...	15	20
अज्ञानिनो	...	19	21
अण्डं तदभवत्	...	26	7
अतनुत विधिम्	...	78	75
अथतान् भगवान्	...	24	42
अथ तैः	...	34	67
अथ तैस्तरुणादित्य	...	3	18
अथ देवाः	...	43	85
अथ देवो महादेव्या	...	73	33
अथ मनसि वचः	...	10	38
अथ वेधा विधेयानाम्	...	55	13
अथ साऽचिन्तयत्	...	16	40
अथ सा लोक	...	61	72
अथ तान्	...	24	42
अथासूरान्	...	24	82
अथोदतिष्टत्	...	51	70
अथैकांशेन	...	2	76

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोक:		श्लोक संख्या	पुट संख्या
अनवद्येश्वर	...	38	84
अनाहूता	...	70	33
अनुतिष्ठ यथोक्तं	...	53	70
अनुभूतमनेक	...	71	51
अनुयानाय	...	81	35
अनुलेपायते	...	11	19
अनेककोटि	...	46	69
अन्तर्दध्रे तदा	...	20	41
अन्यासु धन्यासु	...	20	64
अन्येनांशेन	...	4	77
अन्योऽपित्र वरो	...	31	83
अन्योन्यम्	...	62	72
अपनोदयन्तु	...	66	73
अपराधं द्विः	...	95	36
अपाहरत्	...	28	23
अपेक्षितोऽयं	...	33	24
अप्राकृतेन देहेन	...	19	41
अवला वयं	...	67	73
अभयाम्बेति	...	34	84
अभिप्रायम्	...	42	10
अभीपिक्ते	...	23	82
अभीतिवरदं	...	55	86
अमर्यादा शम्भो	...	76	52

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोक:		श्लोक संख्या	पुट संख्य
अर्घ्यादिकाभि:	...	12	4
अवतंसित	...	54	13
अवतंसितशीतरश्मि	...	70	51
अवनतमुख	...	38	10
अवलोक्य ततः	...	77	34
अवसाने शुचेः	...	5	77
अवोचत वचो	...	47	46
असतस्ते सती	...	36	44
अस्माकम्	...	38	68
अहो जगद्धातरि	...	57	13
अहो सदस्या	...	14	39
अहं निमित्तम्	...	9	61
आकर्ण्य कर्ण	...	21	6
आकर्ण्य वाणी	...	50	12
आचारो व्यवहारश्च	...	5	60
आनम्यागस्त्य	...	22	6
आपद्गता नाम	...	68	15
आपाताल	...	51	28
आपातालनभोन्तरिक्ष	...	48	28
आपातालविघूर्ण	...	36	67
आपदुद्धारकत्वेन	...	52	48
आतन्महे	...	13	4
आदित्सुम्	...	4	2

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोक:		श्लोक संख्या	पुट संख्या
आबालगोपाल	...	11	78
आरुह्य स्वं वृषभ	...	101	57
आरुह्य वृषभं	...	35	84
आवाहने	...	39	25
आविष्करोतु	...	1	1
आविष्टे वीरभद्रेण	...	34	44
आविर्भूतमथ	...	53	48
आविरासन्	...	1	76
आलोक्यतां सः	...	18	63
आस्वादिताः	...	6	2
आसीदिदम्	...	23	7
आस्वादिते मया	...	41	68
आशेषस्थानम्	...	56	30
आश्वास्यताम्	...	21	41
आश्रयेण सपत्नीनां	...	75	74
आश्लिष्टा स्यात्	...	7	37
इति ते गदितं	...	49	70
इति दत्तवरे	...	42	85
इति दत्वा	...	65	87
इति निगदति	...	76	34
इति निगदितं	...	72	90
इति वक्ष्यताम्	...	25	65
इति वादिनि	...	80	35

CC0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोकः		श्लोक संख्या	पुट संख्या
इति वादिनि धातरि	...	53	29
इति वादिनि वीर	...	38	45
इति विलिखित	...	76	90
इति संप्रार्थितो	...	32	83
इति संस्तूयमानो	...	64	87
इति स्तुतो	...	69	16
इत्थं चरन्त्यां	...	8	78
इत्थं लोकेश्वरम्	...	65	15
इत्थं वादिनि	...	72	74
इत्यतिक्रान्त	...	42	46
इत्याकर्ण्य	...	60	14
इत्याकर्ण्य महेशस्य	...	73	90
इत्यादिकं	...	35	24
इत्यादिष्टा	...	82	35
इत्यादिष्टा देव	...	80	75
इत्यादिष्टो देवदेवेन	...	21	81
इत्यादिष्टो वीर	...	33	44
इत्याद्यैर्जगताम्	...	69	33
इत्युक्त्वान्तर्दधे	...	71	17
इत्युक्तमात्रे	...	67	50
इत्युक्तमात्रे सति	...	32	44
इत्युदीरित	...	60	30
इत्येतावन्	...	50	47

CC-0 Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोकः		श्लोक संख्या	पुट संख्या
इमे विलज्जिता	...	59	49
उज्जहार पुनर्भूत्वा	...	24	22
उज्जीवितो भगवता	...	69	50
उत्कृष्टं वा	...	47	70
उत्तरस्मिन्	...	36	84
उत्तिष्ठन्तु	...	66	50
उत्सवो	...	40	84
उद्दधार	...	23	22
उपाध्याया	...	77	52
उलूकानां	...	9	3
उक्षाणमेनं	...	6	37
एकासापि	...	52	70
एकोनषष्ट्या	...	3	36
ऐश्वर्यातिशयेन	...	37	25
ऐश्वर्योगाति	...	64	50
कर्णालम्बित	...	50	86
कतिचन	...	31	8
कथमेतदुदाहृतं	...	73	74
कथाभिरनुरूपाभिः	...	57	30
कदाचिन्माधवे	...	28	83
कन्याः काञ्चन	...	60	72
कंसेन हिंसिते	...	31	23
कस्तूरि	...	49	85

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोक:		श्लोक संख्या	पुट संख्या
करे शूलं	...	10	19
कलानां	...	4	59
कलेरंशे	...	87	54
कल्पानोकहमूले	...	67	15
कल्पान्तकाले	...	57	71
कामो यद्ययमेष	...	88	54
कालकूट	...	42	69
कालुष्येण	...	26	82
काशी नाम	...	14	5
किञ्चिदुत्स्मय	...	60	49
किं यत्कालं	...	86	54
किं वो विस्मृत	...	27	23
किमत्र कृत्यं	...	66	32
किमिदमिह	...	39	10
क्रीडामयूर्या	...	10	61
कुमारोऽपि	...	10	78
कृत्वागस्तव	...	55	48
कृत्वा निश्चय	...	18	40
कोपस्तस्य	...	22	42
क्वचिद्रेतोबिन्दु	...	74	52
क्वाहं सिद्धसुरेद्र	...	74	74
क्षीराब्धेः	...	30	66
क्षीराब्धौ	...	30	7

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोक:		श्लोक संख्या	पुट संख्या
खगपति	...	23	65
गङ्गाधरश्च	...	45	69
गङ्गा हैमवती	...	44	69
गत्वा तत्र तपः	...	70	16
गृहीतकनकच्छत्र	...	61	87
गौरवेण	...	9	38
गौरी मयूरी	...	19	6
गौरीमायूरमित्येव	...	33	84
चतुष्टय्यपि	...	46	46
चाम्पेयकुसुमाकार	...	51	86
चारूरुजङ्घम्	...	59	87
चिरं तपस्यत	...	28	7
चोलावनी	...	67	87
जगन्मातरि	...	97	56
जनित्वा	...	93	55
जातानामिह	...	48	70
जानामि.	...	100	57
जिगमिषति	...	74	34
ततः कल्पतरुर्नाम	...	32	66
ततः प्रभृति धातु	...	66	87
ततः प्रसन्नो	...	61	49
ततः संमन्त्रयामासुः	...	22	64
ततः स भगवानाद्यः समये	...	25	7

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोकः		श्लोक संख्या	पुट संख्या
ततः स भगवानाद्यो	...	107	58
ततः सभासदः	...	54	48
ततः समाहूय	...	6	18
ततः समुद्धतैः	...	32	8
ततः स सर्व	...	21	64
ततः सर्वे सुपर्वाणः	...	41	10
ततस्तदमृता	...	40	10
ततस्तासु	...	81	75
ततस्तास्सह	...	63	72
ततः तस्मद्विस्मापित	...	33	67
ततः सुगन्धकानने	...	17	80
ततस्सती	...	84	36
तत्तादृग्विभवम्	...	66	15
तत्तादृक्षम्	...	30	23
तत्तादृक्षगुणाश्च	...	23	42
तत्तादृक्षे तमस्यन्धे	...	24	7
तत्समानगुणः	...	15	5
तदन्तिकं प्राप्य	...	53	12
तदन्तिके तरुम्	...	3	77
तदिदं कथमस्माभिः	...	79	75
तदलं वचनं	...	76	74
तदा कलित	...	48	85
तद्वर्णय	...	20	6

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोकः		श्लोक संख्या	पुट संख्या
तपस्तप्त्वा	...	72	17
तपस्तप्तं	...	61	14
तपश्चरन्त्यास्ते	...	15	62
ततो मयूरीत्व	...	54	70
तमो विद्वद्कल्पाः	...	91	55
ताम्बूलराग	...	52	86
तारको नाम	...	19	81
तिष्ठन्त्वेते	...	30	43
तुलां समाक्रामति	...	41	85
तत्र केचन	...	61	30
तत्रापश्यन्	...	47	85
तत्र पश्यन्वृत्रवैरि	...	16	80
तत्रासीनं	...	1	58
तत्रास्ते	...	12	62
त्रिदशपुङ्गवाः	...	22	81
त्रिवलीललितो	...	57	86
त्रेताभिधाने	...	26	23
त्वय्येकस्मिन्	...	36	9
दक्ष त्वमद्य	...	41	26
दक्षं प्रजेशा	...	7	60
दक्षः प्रजानां	...	5	18
दग्धं पूस्त्रय	...	49	47
दत्ता मया	...	8	19

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोक:		श्लोक संख्या	पुट संख्या
दधीचिनामा	...	40	25
दयया देवदेव:	...	18	81
दया यदि वद प्रभो	...	17	63
दयाभ्यधिकया	...	98	56
दहनाङ्ग	...	72	51
दाक्षायणीति	...	68	32
दिक्पालत्वं	...	15	80
दुर्निमित्तानि	...	25	82
देवत्वं कथमस्य	...	40	45
देवा वा मुनय:	...	29	43
द्रष्टुं सुतां तां	...	9	19
न जानात्येप	...	12	19
नदीभिरति	...	69	73
नन्दनोपवनम्	...	44	11
नमस्यत:	...	56	13
न लेखबाला	...	46	27
न विष्णुना	...	62	14
न विष्णुमाश्रित्य	...	42	26
न शोभनम्	...	12	39
नाम्ना दक्ष:	..	25	42
निधूय	..	29	7
नियमातिक्रमो	...	71	33
निष्क्रिया	...	63	49

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोकः		श्लोक-संख्या	पुट-संख्या
निष्प्राणेषु	...	40	68
नीलकण्ठस्य	...	16	63
नृत्यद्गन्धर्व	...	62	87
पत्नी मदीया	...	31	43
पद्मभूपद्मनाभ	...	34	67
परकीयेन दग्धानां	...	68	73
परित्यजामि	...	16	20
परीक्षां पापे	...	90	55
परेद्युः	...	82	53
पारे परार्ध	...	103	57
पाशी वशीकृत	...	46	11
पिता तत्राऽयं	...	78	35
पितृत्वं	...	74	51
पिनाकपाणिना	...	59	30
पुनरुत्साह	...	50	70
पुरा यस्मिन्नृक्षः	...	104	58
पूर्वं कापिलकोप	...	58	71
प्रजापतीन	...	4	18
प्रजापतेस्तु	...	1	17
प्रथमं प्रमथेशानाः	...	14	62
प्रणन्तुं	...	73	51
प्रायश्चित्तमधस्य	...	55	71
प्रायश्चित्तमवाप्य	...	30	83
प्रेपयन्नेक	...	83	36

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोकः		श्लोक संख्या	पुट संख्या
प्रोक्तं पुनः	...	43	26
बलावलेपेन	...	29	23
बलिना	...	25	22
बाणो विष्णु	...	63	15
ब्रह्महत्या	...	6	60
ब्रह्माणः कति	...	29	43
भक्तिं कुर्वन्तु	...	64	31
भवन्माया	...	94	56
भीता यस्य	...	48	47
भृग्वादयोऽपि	...	68	50
भोजादिभिः	...	5	2
मखेषु यस्मिन्	...	71	88
मणितोरणमाङ्गल्ये	...	46	85
मणिदीपसहस्रादये	...	45	85
मथितुममृतमब्धे	...	24	65
मथ्यमाने पयोराशौ	...	26	65
मधुकैटभनामानौ	...	22	22
मध्यस्थत्वं भावयन्त	...	45	46
मनः किं वा कर्ता	...	84	54
मन्दस्मित	...	53	86
मन्दस्मितमुखः	...	43	46
मन्दारमूले	...	3	59
मयि प्रजापतौ	...	14	20

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोकः		श्लोक संख्या	पुट संख्या
महतोऽस्वमतिर्मनः	...	13	39
महीभृता मन्दर	...	29	66
माता पिता	...	2	17
माद्यन्ति वा महति	...	63	31
माद्यन्त्यर्थमदेन	...	99	56
मायया	...	34	24
मायूरनाथ	...	39	84
मायूरनाम	...	17	5
मुष्टीमुष्टि	...	28	43
मुहुर्मुहुविधेरर्थे	...	58	30
मोहो महानस्य	...	65	32
यः काश्यपो	...	19	64
यत्वं मया	...	8	3
यजमानपदे	...	38	25
यज्ञस्त्वया	...	26	42
यज्ञोपवीति	...	13	20
यतो भयमभूद्भूप	...	59	14
यत्राऽभयाम्बा	...	68	88
यथा जेतुं	...	85	54
यथापुरं	...	28	66
यथापुरा	...	43	11
यदयं वेधसः	...	20	21
यदि मच्छसि	...	79	35

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोकः		श्लोक–संख्या	पुट–संख्या
यदि याज्या	...	39	45
यद्येकस्य	...	49	12
यस्त्वया	...	58	49
यस्य प्रभाणाम्	...	105	58
यस्य भृङ्गतल	...	106	58
यस्य वीक्षा	...	67	32
यस्यालकापू:	...	102	57
यस्यावाप्य	...	4	37
यस्मिन्नात्र	...	9	78
यस्मिन्नावि:	...	82	76
यस्मिन्नुत्पति	...	37	67
यष्टास्मि	...	17	20
या काशीति	...	56	71
यामिच्छत्युद्धर्तुम्	...	81	53
यूवामवान्तरै:	...	50	28
ये नराः	...	37	84
यो गण्डकण्डूम्	...	3	1
यो वाऽमंस्त	...	21	21
रक्षिता	...	32	24
रक्षिष्यति	...	47	27
रत्नाङ्गुलीयक	...	56	86
रम्भासु	...	69	88
राजभि:	...	8	61
लज्जावहै	...	48	11
लेपं हुतस्यात्मना	...	44	26
वयं गृह्णियो	...	8	37

CC-0 TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोकः		श्लोक संख्या	पुट संख्या
वयं विनिक्षिप्य	...	58	13
वयः पञ्चाशन्मे	...	83	53
वर्तन्ते निखिलाः	...	37	45
वर्षे वर्षे तुला	...	71	73
वाणी तवेयम्	...	35	9
व्याघ्रचर्म	...	58	86
व्यासाद्यैः	...	59	71
विचिन्त्य	...	2	36
विज्ञाय	...	51	48
विज्ञायाज्ञां	...	65	73
विधे मुधा	...	55	29
विनिन्दन्तस्ततः	...	33	9
विप्राः प्राक्	...	51	12
विलज्जमानेषु	...	54	29
विलोक्य ताः	...	64	72
विश्वस्ता	...	31	66
विष्णुः कृष्णतनुः	...	39	68
वीक्ष्य तद्विस्मिता	...	49	28
वेगाधूत	...	2	1
वेदव्यास	...	18	5
वेदानधीत्य	...	27	42
वेदार्थानां	...	62	31
वेदोक्तमार्गेण	...	7	18
वेधावेद	...	56	48
वैवस्वत	...	47	11
शतमन्युमुखान्	...	37	10

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोकः		श्लोक संख्या	पुट संख्या
शरीरं कान्तानां	...	79	53
शिञ्जन्मणि	...	60	87
श्रुतिर्ब्रूते	...	80	53
श्रुतिमृस्त्यर्थं	...	92	55
श्वेतारण्यम्	...	16	5
स कालकालः	...	45	27
सं किं करिष्यति	...	18	21
सङ्केतं समतन्वत	...	36	24
सङ्गरे समुपक्रान्ते	...	45	11
साकूतस्मिस	...	77	75
स खलु खलजनानां	...	75	34
सख्यस्तव	...	13	62
सत्वावलोकन	...	11	4
सत्यं वचोऽमत्य	...	12	79
स दीक्षितोऽवेक्ष्य	...	1	36
स दृष्ट्वा	...	52	29
सन्तश्चमत्कृति	...	75	90
संप्राप्ते समये	...	27	83
सभा यस्या	...	52	12
सम्भाष्य	...	35	44
समाश्वास्ये	...	72	33
सम्मूर्च्छते	...	27	66
समूहः सर्पाणाम्	...	10	3
सर्वसाधारणत्वेन	...	35	67
सर्वेषामपि	...	15	40
स शूरपद्मः	...	20	81

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्लोकः		श्लोक संख्या	पुट संख्या
सह्यात्मजाया:	...	70	88
साक्षादिन्दुकलाधरं	...	29	83
सान्त्वितो	...	62	49
सा हि ब्रह्मवनाह्वाने	...	70	73
सुखालीनं	..	34	9
सुगन्धिमन्दमरुता	...	2	59
सुहृदा	...	17	40
सोढं मदेन	...	65	50
सोदयस्विप्यनेकासु	...	5	37
सौवर्णमण्डपे	...	44	85
स्थाने भानोः	...	14	80
स्नात्वा	...	7	77
स्मर्यन्ते	...	89	55
स्रष्टार:	...	43	69
स्वस्वमूलम्	...	27	7
हत्याधं हि	...	41	45
हरिब्रह्मादीनाम्	...	75	52
हविष्षु दूयमानेषु	..	11	39
हसितेऽभ्युदिते	...	64	15
हालाहल	...	54	86
हे ब्रह्मन्	...	44	46

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(SARASVATI MAHAL LIBRARY PRESS, THANJAVUR)

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy